संबंधस्य द्वितीया तृतीयावत्प्रतियोगि लेवद्वितीया हि नत्वं द्योतकानुद्योतक कर्मप्रवचनीयसंज्ञाविधायके हिनेइसनुशासनादनुहो
रिशांइसत्रानोः कर्मप्रवचनीयत्वद्वितीयातथाच्छहरिः प्रतियोगिकापकोर्षवत्तृइत्यर्थः अधिहरौ नैचयोस्य उपेसस्य कर्मप्रवचनीयसं
ज्ञाविधायकादुपोधिकेवेसनुशासनाद्धीनेउपहरिं सुरइत्यत्रोपशब्दस्य कर्मप्रवचनीयसंज्ञा वधिपूर्ववत् स्वर्गायपेक्षया धिकवानहरादन्य ७७

उपश्चार्प्या द्रोणइत्यादौ यस्मादधिकमिति शप्तमी वक्तव्यतरन्ति वैयाकरणान्सै द्रौपुपसुरान् हरिरित्यादौ सप्तमितियोगिकाधिकत्वादि
देवोधादधिके पिद्वितीयाप्रवत्तीत्युक्तम् अत्र सप्रम्या वाधादुपसेपुहरीति सप्तमी वेह सातारूरहो एवं भूता रत्मानभागवीप्सार्थेषु प्रति
पर्यनूनां कर्मप्रवचनीयसंज्ञाविधायका लुहहाते एवं भूता रत्मानभागवीप्सासु प्रतिपर्यनवइसनुशासनाद्वृक्षं प्रतिपरि अनुवा विद्यो
तते विद्युदित्यादौ कर्मप्रवचनीयत्वात् कर्मप्रवचनीययुक्ते द्वितीयेति द्वितीया वृक्षज्ञानजन्यज्ञानविषया विद्युद्द्योततइत्यर्थः भक्तो
विष्णुं प्रतिपर्यनु वा अत्रविषयत्वाख्यो द्वितीयार्थः तस्य पदार्थैकदेशे भक्तावन्वयः तथा च विष्णुविषयक भक्त्याश्रय इति बोधः इत्थं
भूतः कश्चित्प्रकारं प्रेदं तस्य आख्यायतेतिरूप्यतेनेनेतीत्थं भूताख्यानम् प्रकार विशेष निरूपकत्वं लक्ष्मीं हरिं प्रतिपर्यनु वा सिंचनी
त्यत्र आप्यत्व विशिष्ट वृक्षादिकर्मकसेचन क्रियेति बोधः यदा कर्मत्वस्य संबंधत्वेन विवक्षा तदाप्यनेन द्वितीया वृक्षनिष्ठ आप्यतानि
पित्यापकत्ववती सेक क्रियेति बोधः यदा तु मरुतीति रूपितः संयोगाश्रयत्वं वृक्षे विवक्षितं तदा जलेन वृक्षं वृक्षं प्रति सिंचतीति प्रयोगे
वृक्षकर्तृ रीप्सितत मंकर्मत्वमस्ति यदानु वृक्ष संबंधि जलकर्मिका सेचनक्रियेति बोधः तदा वृक्षं वृक्षं प्रति जलं सिंचतीति प्रयोग त्र जलेकर्तुरी

~~[illegible]~~म्। इति कर्तुर्लक्षमनुहेतुनुकर्मप्रवचनीयत्वाद्द्वितीया। भागवर्के लक्षणादावभेः कर्मप्रवचनीयसंज्ञा। विधायकाधिकारभाग
इत्यनुशासनाद्रूपमभिवर्त्तते साधुर्मातरमभि निवृत्तमपि सिंचतीत्यादौ वाभेः कर्मप्रवचनीयसंज्ञायां द्वितीयापत्ता भावश्च बोध्यः। इत्थंभूत। भागेनु
नयदत्र मम माभिष्याद्दीयताम्। अत्र च कर्टेनवुद्धिस्थानभागबोधकः। प्रसंबंधियद्भागकर्तृकाणदधिकरणिकास्तत्रापूरणविषयतकर्मकदा
नमिति बोधः। अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु इत्यनुशासनादपिः कर्मप्रवचनीयः सर्पिषोपि स्यात् अपि स्त्रीयान्वितनुदीर्त
स्यप्रयुक्तशीलस्यापि प्रयोनकः। यथा सर्पिर्दवयवबिंदुकर्तृकानुद्धिंदुप्रयुक्तशीलभवनी संभावनाविषया सत्तेति बोधः। उदकस्यापि स्यादिः
स्यादौ कर्माहिपः। तथा चोदकावयवबिन्दुकर्मिकानुद्धिं दुःशीलभवनप्रयुक्तशीलभवनी संभावनाविषयादेवदत्तकर्तृका चमनक्रियेति बोधः।
अपि स्तूयाद्विष्णुमित्यत्र विष्णुकर्मिका एतत्कर्तृका शक्यत्वेन संभाव्यमाना स्तुतिरिति बोधः। धिग्देवदत्तमपि स्तूयाद्वृषलमित्यत्र वृषलकर्मिका गर्हा
स्तुतिरिति बोधः। स्तुतिगर्ह्यत्वेन तत्कर्तुरपि गर्ह्यत्वं कस्मात् एवंविधद्वितीयार्थं नानात्वं द्वितीयपत्वं द्वितीयार्थ इति भूषणे मणास्त
प्रतिवन्तधातूपस्थाप्यपाककर्मकं कर्मत्वानुकूलस्तुप्रजातीयत्वं द्वितीयात्वं वोरस्य हितम्। स्यत्रावन्तिनधात्वर्थेकर्म ३६

त्वप्रतिपादिका षष्ठी न पाके तंदुलस्य पाक इत्यादौ पाके तादृश्यपि न तिवन्तपाठार्थे ग्रामं गमयतीत्यादौ ग्रामादेः पाकादौ कर्म
त्वाधनानुभावकत्वेपि तदनुभावकसजातीयत्वाभावान्नाप्तिः। वस्तुतस्तु संकेतविशेषसंबंधेन द्वितीयापदमेव द्वितीयात्वम्। एवं तृतीया
द्वावपि तृतीयाद्वितीयाका कर्तुरीप्साविषयप्रधानभूतधात्वर्थव्यापाराश्रयत्वरूपस्वातंत्र्याश्रयस्य कर्तृसंज्ञाविधायकत्वात्। तंत्रः। कर्त्रे
इत्यनुशासनेन रामेण बाणेन हतो वाली इत्यादौ रामस्य कर्तृसंज्ञायां सत्यां कर्त्रीप्साविषयाभवदिति नफलजनकव्यापाराश्रयत्वरूपसा
धकतमस्य बाणस्य करणसंज्ञाविधायकसाधकतमं करणमित्यनुशासनेन बाणस्य करणसंज्ञायां सत्यामुभयत्रापि कर्तृकरणयोस्तृ
तीयेत्यनुशासनात्तृतीया उभयत्राप्याश्रयत्वं तृतीयार्थः। कर्मत्वकर्तृत्वकरणत्वाधिकरणत्वानि विशेषणविशेष्यभाववदनियतानि नतु
गोत्वादिवद्वस्तुविशेषनियतानि। अत्र रकाविषयेति विशेषणम्। रामकर्तृकबाणव्यापारसाध्यप्राणवियोगाश्रयो वालीति बोधः। अ
थकर्त्रा त्रिविधः केवलः प्रयोजको हेतुः कर्मकर्त्ता चेति देवदत्तेन हरिः सेव्यत इति शुद्धः कार्यतीति हरिणेति प्रयोजको हेतुः गमयति कृष्णं गो
कुलमिति कर्मकर्त्तादेवदत्तोपि नाश्रयको हरिकर्मकः सेवनानुकूलो व्यापारः हर्षणिजर्थाश्रयकउत्पादनानुकूलो व्यापारः गोकुल

कर्मकिंगमनानुकूलो व्यापारः। तदाश्रयकत्वात्तादृशव्यापारानुकूलो व्यापारः इति यथा कर्मबोधनानुविवक्षायां कारकविभक्तयो
नाना भवंतीत्युक्तत्वात् तद्वदनंतः काष्ठैः पचतीति वत्काष्ठानि देवदत्तेन पचंतीत्यपि स्यादिति चेन्न। यथा हि कर्तीन समुक्ते न तदेवमाके
तस्य प्रतिनिधिः दृश्यते व्रीह्यभावे नीवारैर्यजेतेत्यनुमानात् तदेवं कर्मांतरमेति प्रसिद्धिः। किं च काष्ठानां तानुपादानेष्वपि दृश्यते न
वं स्थाल्यादि विक्लित्त्यनुकूलकारकचक्रप्रयोक्तृत्वमुख्यकर्तृत्वं तत्र अन्येषां तु विवक्षारूपगौणकर्तृत्वे न देवदत्तप्रयोजकत्वाभावात् न तु विव
क्षा च शाकाष्ठादि करणादीनां कर्तृत्वादिव संप्रदानापादानयोरपि कर्तृत्वापत्तिरिति चेन्न। शब्दशक्तिस्वाभाव्यात् त्रिविधक्रियया प्राधा
न्यस्य स्वीकारात् तान्नवा स्मिन्नामसंभवे वसी स्यादेकस्य कर्तृत्वकर्मत्वकरणत्वानुपपत्तिः। न च विवक्षावशान्निर्वाहः पर्यायेण
तथा वक्तुं शक्यत्वेपि अकडारादेका संज्ञेति नियमादेकस्यैव वस्तुनो युगपदेकक्रियानिरूपितकर्मत्वकरणत्वादिरसंभवादिति चेन्न
स्वमाप्रमाणवारुकाराद्युपाधिभेदेनान्यतोपि भेदं स्वीकृत्य समाहितं भाष्ये। एतेन न चैकस्यैव करणत्वकर्मत्वस्वीकारे कर्मकरणभि
न्नानाविधव्यवहारानुपपत्तिः व्यवहर्तृभेदस्यैव व्यवहारभेदनियामकत्वादिति चेन्न। उपाधेयसंकरेपि न्यायेन व्यवहर्तृभाजे १८

भेदेपि व्यवहर्तृत्वाच्च एकस्यैव भेदाद्देवदत्तादौ स्वपाचकपाठकादिविव व्यवहारस्वीकारस्वीकारादिविवक्षातः कारकविभक्तयो ना
ना भवंतीति शाब्दिकाः। अपि तत्रानुकूलादि इति तार्किकोक्तरूपप्रत्यक्षभावदृष्टांतेन हि देवदत्तः पाचकः पावकः इति वदत्यां कर्मकर
णादिव्यवहारसिद्धिः पितृकस्यास्वतः कर्मकरणयोरसंभवात्। अपि तथा स्थानमात्मनाकेनेति वत्काष्ठानि काष्ठैः पचंतीत्यपि स्यादि
ति सर्वोपप्लवः स्यात्। तदुक्तमनुसरामः। तार्किकास्तु कारकविभक्तिरूपप्रत्ययार्थः क्रियान्वयि कर्तृत्वं करणत्वं स्वार्थः। कर्तृत्वं च मुख्य
क्रियानुकूलाकृतिः कृतिरूपावकर्तृतास्मात्तत्समपि व्याहतेश्चैत्रः पचतीत्यादौ क्रियाविशिष्यतयास्मात्तेन प्रत्याप्यामेव तेनाप अन्ते शप्यत
द्वस्यादिकर्मभावात्कर्मत्वस्यापि च क्रियाविशेषणतया अन्वयापत्त्याप्येतरस्यानुः। तन्मते घटो भवतीत्यादौ घटादीनां कर्तृत्वं न स्यात्। न च
तत्र आश्रयत्वं कर्तृत्वं भाक्तत्वेपि घटे न भूयतेऽस्य तत्र कृतीयानस्यात्तदुःखोत्संज्ञायामेव नियामकत्वं स्यात्। अनेककारकभगापत्तेश्च विस्तारत
स्तन्त्रताख्यातवादेषु। केचित्तु करणत्वं कारकांतरनिष्ठव्यापाराद्वारा क्रियाहेतुत्वाभाववत्क्रियाहेतुत्वमात्रस्येनैक कर्तृकर्मणोः
करणनिष्ठव्यापाराद्वाराधिकरणस्य कर्तृकर्मान्यतरनिष्ठव्यापाराद्वारा संप्रदानस्य स्वानुमतिकर्मिक्रीस्यात् तद्द्वारा ऽपादानस्य पतन

प्रतिबंधकयोगनाशकविभागद्वारा च क्रियाहेतुत्वादतिव्याप्तिवारणमित्याहुः॥ अन्ये तु व्यापारवत्साधारणकारणं करणम्। व
दं प्रति कपालसंयोगवारणाय व्यापारवदिति निर्दिष्टं। अत्र वारणायासाधारणेति॥ असाधारणकारणत्वं च कार्यत्वावच्छिन्नकार्यता
निरूपितकारणताश्रयत्वमिति वदन्ति॥ यत्तु भूषणे उक्तं करणतृतीयायाः अव्यापाराश्रयव्यापाराश्रयार्थ इति तन्न काष्ठादिकरणनिष्ठव्यापारस्य
स्थाल्यादिकरणनिष्ठव्यापारवत्त्वार्थविषयकत्वेन पुनस्तृतीयार्थत्वकल्पनस्यानुचितत्वात्। न च प्रत्ययार्थत्वमेवास्तु धात्व
र्थमिति वाच्यं। अन्यप्रत्ययार्थत्वे काष्ठानि पचंतीत्यादौ काष्ठादीनां धात्वर्थव्यापाराश्रयत्वाभावेन कर्तृत्वानापत्तेः॥ दिवः साधकतमस्य यु
गपत्कर्मसंज्ञाकरणसंज्ञाविधायक दिवः कर्म चेत्यनुशासनादक्षैर्दीव्यति अक्षान्दीव्यतीत्यादौ द्वितीयातृतीये च॥ अत्र करणं केवलकर्त्री
इति बोधः॥ न चात्र परत्वात्कर्तृसमानकालिकगोस्वामित्ववान्पितेति यथा कर्मीस्योक्तेतीति षष्ठ्या अक्षाणां दीव्यते संबंधो वाच्यित्वमि
वेनाकर्तृसाहचर्येण धात्वर्थकर्मण्येव तन्नष्टृतेः॥ न चात्र परत्वात्तृतीयैव स्यादिति वाच्यं। कार्यकालपदकर्मणि द्वितीये यत्र पदस्यो
पस्थानं तत्समानकालीनत्वाद्द्वितीयोपपत्तेः॥ प्रकृत्यादिभ्यः सर्वविभक्त्यर्थे तृतीयाविधायक प्रकृत्यादिभ्य उपसंख्यानमिति सनु १०

शासना प्रकृत्या चारुरित्यादौ तृतीयायाश्च प्रातिपदिकार्थे यावत्कालवृत्तित्वाद्गत्वमिति बोधः। चारुत्वं प्रकृतिधर्मविशेषः। प्रायेण या
ज्ञिक इत्यादौ प्रायशब्दस्यावच्छेदकावच्छिन्नग्रहीत्यविशिष्टबाहुल्यमर्थः। तृतीयाया अवच्छिन्नत्वमर्थस्तथा च किंचिन्न्यूनबाहुल्यमाव
च्छिन्नयज्ञविधावानिति प्रतिपत्त्यर्थकीत्येवमर्थः॥ नाम्ना चंद्रः कलेत्यादौ नामपदं चंद्रः कलाशब्दालिनाद इत्यर्थः॥ ननु सर्वत्राहि भक्ति
याकारणत्वात्तृतीयासिद्धौ अर्थमिदमिति चेन्न। संबंधत्वेन विवक्षायां षष्ठीबाधनार्थत्वेन सार्थक्यात्॥ अस्मिन्नेव प्रकृते तृतीयायाः संब
धोर्थः। द्वयोर्गुणप्रधानभावेन गुणक्रियादव्यरं अन्वयबोधकसहशब्दप्रयोगे क्वचित्प्रयोगे वा अप्रधाने तृतीयाविधायक सहयुक्तेऽप्रधाने इ
त्यनुशासनात् पुत्रेण सहागतः पिता पुत्रेण सह पिता स्थूलः पुत्रेण सह पितुर्गौरित्यादावर्थेन्वयकृत्यप्रधानात्तृतीया तत्प्रयोगं विनापि वृद्धो
यूनेत्यादौ बोध्यम्। सहार्थश्च समभिव्याहृतपदार्थसमानकालिकसमानदेशरूपसाहित्यसंबंधस्तृतीयार्थः। तथा च पुत्रसंबंधि आ
गमनवत्समानकालिकागमनवान्पितेति बोधः। पुत्रसंबंधिस्थौल्यसमानकालिकस्थौल्यवान्पिता। पुत्रसंबंधिस्वामित्वसमानका
लिकगोस्वामित्ववान्पितेति यथाक्रमं बोधः॥ वैयाकरणास्तु मुसलिवादानुसारेण तृतीयार्थश्च क्रियासमभिव्याहारे सहार्थबलात्तृतीय

मानस्वप्रकृत्यर्थक्रियाकर्तृत्वेनाभिधानात् एतत्क्रियाकर्तृत्वादिकमेव तथा च पुत्रकर्तृकसमानकालिकागमनवान् पितेति बोधः। इत्थं
गुणसमभिव्याहारेण सहार्थसंबंधे एवं च पुत्रस्याकर्तृत्वेन तृतीयासिद्धा न चैकेनाभिधानमाद्यत्तरसमभिव्याहारे विनापि प्रतीयमानस्व
प्रकृत्यर्थक्रियाकर्तृत्वेनाभिधानात् एवं पुत्रेण सहागमनं देवदत्तस्येत्यादौ प्रतीयमानस्य प्रकृत्यर्थान्वयिनः कर्तृकर्मणोर्वा षष्ठी।
न तु प्रतीयमाने तत्र स्वपितोरिति न दोषः एवं पुत्रेण सहागमनं तत्र स्वयिनोरिति न दोषः तथापि पुत्रेण सह स्थूल इत्यादावर्थस्तत्रापि स्याद्धु
तन्मते कर्तृत्वस्य संबंधत्वेन विवक्षायां क्रियान्वयेपि तत्स्यान्वयावश्यकत्वात् न चैतत्समभिव्याहारं विनेति। संबंधत्वेनाविवक्षायामप्यागतेः
ति कप्रत्ययेन कर्तुरुक्तत्वात् तृतीयाप्राप्तौ क्रियायोगे पितृस्यावश्यकत्वात् न चैतत्समभिव्याहारं विनेति गूढो कारितिः साधीयस्का चैतेनाभावा
विनिगमनाविरहेण तत्समभिव्याहारं विना प्रतीयमानस्वप्रकृत्यर्थक्रियाकर्तृत्वेनाभिधानवत्त्वात् तत्समभिव्याहारं विना प्रतीयमानक्रिया
कर्तृत्वेन तृतीयेति वक्तुं शक्यत्वात् किं चोक्तरीत्या पितागतः पुत्रोपीत्यादौ पुत्रे तृतीयापत्तिः पितुरागमनं पुत्रस्यापीत्यावश्यकतापत्तिः। अन्ने
कनिष्ठकल्पनायां फलाभावश्चान्वभाष्यानुरोधात् तथा कल्पते भाष्यस्य पित्रा सह पुत्रेणोदनः पच्यते इत्यत्रपरत्वात् यदपि प्रधानप्रयोगस्था १९

नपरभाष्यमुपपदविभक्तेः कारकविभक्तिर्बलीयसीति तत्र कारकशब्दस्यान्तरंगपरतया व्याख्यानं हृदयदत्तादीनामंतरंगमपि बाधित्वा
प्रवादत्वात् तृतीयास्यादित्येतेन दूषयां चक्रुर्व्याख्यानस्तदपि न अपवादेपि प्रयुक्तयत्र चरितार्थस्तत्रैव तदङ्गेण बाध्यते। यथा तातङः हेर्वादीशो
न स्यात् क्रियान्वयित्वरूपकारकत्वमादाय शास्त्रप्रवहारदर्शनाच्च सहैवदशभिः पुत्रैर्भारं वहति गर्दभीत्यादौ पुत्रसंबंधिभारवहनसमान
कालिकगर्दभीकर्तृकभारवहनमिति बोधात् साहित्यबोधक एव सहशब्दः केचित्तु विद्यमानतावाचिसहशब्दमाश्रित्य दशपुत्राणां विद्यमा
नतापि बोधमाहुः तत्र पुत्रेण सह स्वाप्यापत्तेः। विकृतेनांगेन यत्रांगिनो विकारो लक्ष्यते तत्र विकृतांगवाचकात् तृतीयाविधायकात् येनांग
विकार इत्यनुशासनादक्ष्णा काण इत्यादौ तृतीया अक्षिसंबंधिकाणत्ववानयं चैत्र इति बोधः। अक्षि काणमस्येत्यादौ तु अंगविकारेण
लंगिविकृतांगविकारात् तृतीयायाभावः कश्चित्प्रकारं प्राप्तस्य लक्षणस्य लक्षणवाचकात् तृतीयाविधायकादित्थंभूतलक्षण इत्यनुशास
नात् जटाभिस्तापस इत्यादौ तृतीया लक्षणभावसंबंधश्च तृतीयार्थः। जटाज्ञाप्यतापसत्वविशिष्ट इति बोधः। संपूर्वस्य जानातेः कर्मणि
तृतीयाविधायकात् संज्ञोन्यतरस्यां कर्मणीत्यनुशासनात् पित्रा पितरं संजानीत इत्यादौ पाक्षिकी तृतीया कर्मत्वं तृतीयार्थः। तथा च पितृकर्मं

कं ज्ञानमिति बोधः ।३। अथ क्रियागुणसाधारणकारणरूपे हेतौ निर्व्यापारकारणरूपे फलरूपे च हेतौ तृतीयाविधायको हेतौ इत्यनु
शासनाद् दंडेन घटः पुण्येन दृष्टो हरिः अध्ययनेन वसती। स्यादौ तृतीयार्थः दंडहेतुको घटः। पुण्यहेतुकं हरिदर्शनम्। अध्ययनहेतुको वासः
इत्यर्थाक्रमं बोधाः ॥ ॥ इति तृतीया ॥ ॥ श्रीगुर्वंघ्रियुग्माय नमः। कर्तृधात्वर्थक्रियाजन्यफलाश्रयेण संबद्धुमिष्यमाणस्य कारकस्य संप्रदा
नसंज्ञाविधायका कर्मणा यमभिप्रैति स संप्रदानमित्यनुशासनात् विप्राय गां ददाती। स्यादौ विप्रादीनां संप्रदानसंज्ञायां सत्यां संप्रदाने चतुर्थी
इति चतुर्थी। संप्रदानत्वं च धात्वर्थक्रियाजन्यफलाश्रयसंबंधित्वेन कर्त्राभिप्रेतत्वं। परंपरापार्थिवसंकेतविशेषसंबंधेन तत्सद्वाक्त्वं वा। दाधात्वर्थ
श्चात्यागोद्देश्यकस्वागानुकूलो व्यापारः। एवं च विप्रोद्देश्यकः गोनिष्ठस्वागानुकूलो व्यापारो देवदत्तकर्तृक इति बोधः। एवं वृक्षायोदकं सिंच
ति शत्रवे वस्त्रमुंचति मित्राय हृतं प्रेषयती। स्यादौ वृक्षोद्देशकोदकनिष्ठक्रियानुकूलक्रिया देवदत्तनिष्ठा इति बोधः। यदि तु दाधातुयोगे एवा
नेन संप्रदानमिति स्याग्रहः। तदा युद्धाय संनह्यति इति वक्तुमर्थाच्च प्रावचनादिसत्तेन चतुर्थी। अनुशासनं तु शौर्यं दाधात्वर्थश्च स्वत्वस्वत्वान
निवृत्तिः उभयानुकूलो व्यापारः। तदेकदेशस्वत्वे चतुर्थ्यर्थस्योद्देश्यत्वस्य निरूपकतया अन्वयः। एवं च विप्राभिन्नोद्देश्यनिरूपितस्वत्व ११

स्वत्वनिवृत्तिः उभयानुकूलः क्रिया निर्देवदत्तकर्तृकेति बोध इत्युक्तं वैयाकरणनये। यद्यपि स्वत्वे हेतुश्च त्याग एव अन्यत्र एव विदश
स्तं पात्रमुद्दिश्य स्वस्वत्वध्वंसस्वीकारः संप्रदानत्वे पात्रस्य मलिनपिंडद्देश्य पित्रादिपिंडेऽनुशंगह्येत। नात्यैरिति व्यवहारः साधुत्वेन च अ
न्योद्देश्यकत्वविशिष्टत्यागस्य प्रतिग्रहीतृनिष्ठप्रतिग्रहादेरेव तत्र स्वत्वजनकत्वात्। त्यागस्यैव स्वत्वजनकत्वे तु देवदत्तकर्तृके त्यागो
त्तरं स्वत्वोत्पत्तौ प्रतिग्रहणादेव पितुर्वा गृहत्वापत्तिः। न चेष्टापत्तिः। अरण्यस्य दंडादेरिव कस्यापि स्वत्वाभावेन संबंधुं विनियोज्यत्वमि
ति सिद्धांतभंगापत्तिः। भवद्भिरपि स्वत्वं च दानादिनाथ प्रतिग्रहादिजन्यमतिरिक्तपदार्थरूपमिति वदद्भिः प्रतिग्रहादेवास्वत्वजन
कत्वस्वीकारेण न पूर्वापरविरोधस्य स्पष्टत्वाच्चा। तत्संप्रदानं त्रिविधं। अनिराकरणप्रेरणानुमतिभेदात्। यथा अर्काय दत्तो देवदत्तायाच
कोपाध्यायरूपाणि। अनुपदस्थेये च प्रजापतये चक्षाय भवदाति सर्वभूतेषु भूतं जलमुर्जित्नमभि स्यादावपि पशुनाहं यजेत स्यादावपि
त्यागविशेषरूपक्रियायाः उद्देशतिताकर्तृसंप्रदानतया चतुर्थी स्यादिति च न्याय कर्मणः करणसंज्ञा संप्रदानस्य च कर्मसंज्ञेति वार्तिकेन
कर्मतार्थकतृतीया यथा संप्रदानार्थक द्वितीया यथा च पशुं रुद्राय ददाती स्यार्थेपि तस्य साधुत्वं बोधयता तातेन गौरविभवी तिहेतु क्रियायज्ञ

र्थः। तदर्थतावच्छेदकं फलं प्रीतिस्तदाश्रयत्वं याचकस्य विवक्षितं तत्त्वात् कर्मसंज्ञैव न तु चतुर्थी। सा गात्मकत्वाद्दशक्रियायां निरूक्तनिरूपक
र्तृसंप्रदानत्वस्यापि तद्विवक्षणात् प्रीतिभागोत्तरयोर्द्देश्यत्वलक्षणसंप्रदानत्वविवक्षायां चक्रुद्राय यजइ। अपि प्रयोगः। इत्यादिवार्तिकोक्तेप्रा
त्तम्। पशुकरणकरुद्रवृत्तिप्रीतिजनकत्वे यत्तिबोधे तस्य साधुत्वेपि यत्ना चपि रुद्रोद्देश्यकं पशुकर्मकं दानमितिबोधे साधुत्वं न स्यात्। अनु
शासनेनार्थविशेषपुरस्कारेण साधुत्वबोधनात्। अन्यथा गौण्यां भुक्तस्यादिति सर्वगौणीशब्दस्य अपि साधुतापत्तेः। तस्मात् संप्रदानत्वविवक्षा
यां रुद्राय जगत इत्यस्य साधुत्वाभिधानमयुक्तमेव। यत्तु तनु कर्मग्रहणं किमर्थं यमभिप्रैतिर इत्येतावतापि उद्देश्यत्वलाभात् क्रियाग्रहणं वा कर्त्ति
ममितिवार्त्तिकं तन्न कार्यमिति सारं बलाबलमिति चेन्न गोप्युद्देश्यतयां गंगलाभस्येव संज्ञा माभूदिति तदर्थत्वे तु स्वलाभानु च कर्मसंज्ञा न वका
शः। सामर्थ्यात् सर्वथायापत्तेः। रिसूचुः। वैयाकरणैरन्यैः। तत्रापत्तावपीह सकर्मकस्थले संप्रदानसंज्ञायाः सावकाशत्वेन निरवकाशाया
कर्मसंज्ञया बाधेन पर्यायाभावात्। अथवा कर्मसंज्ञासंबंधिपस्थितत्वस्य संप्रदानसंज्ञेति व्यवस्थोपपत्तिः। तस्मात् कर्मग्रहणं कर्मत्वचतुर्थी। नि
मित्तत्वप्रदर्शनेन कर्मश्रुतस्य पक्षे तथा चतुर्थीश्रुतेव सम्बन्धबोधनार्थं नेनकीनिसोमं मैत्रावरुणाय दंडं प्रयच्छतीति दंडप्रदानेन प्रतिपत्तिः। किं २३

तु द्वितीयापेक्षयावत्नी यस्मात् चतुर्थीश्रुत्यैव मैत्रावरुणसंस्कारकमिति। मीमांसकोक्त्योपपः संग्रहो। धात्वर्थक्रियातवच्छेदकधात्वर्थ
क्रियाजन्यफलभागित्वेनोद्देश्यः संप्रदानमितिसमर्थकम्। क्रियया यमभिप्रैतिसंप्रदानमिति वार्त्तिकात् संज्ञेश इत्यादौ संप्रदाने चतुर्थी
ति चतुर्थी। प्रति संप्रदानकपत्नीकर्तृकं शयनमिति बोधो भाष्यमतेप्याह नारंभणक्रियाकर्मत्वं शयनस्येति वार्त्तिकात् प्रत्यमानात् कर्म
णा यमभिप्रैतिस संप्रदानमित्यनेनैव संप्रदानत्वम्। एवं च संप्रदानस्य चरितार्थत्वात् सर्वथायापत्तेरिति निपूर्वोक्तपापास्तम्। तथा च पतिसंप्र
दानकं पत्नीकर्तृकं शयनकर्मकं पत्नीकर्तृकमारंभणमिति बोधः। तथा च हरिः। संदर्शनं प्रार्थनायां व्यवसाये च नंतरा। व्यवसायस्तु यारं
भेसाधनत्वाय कल्पते। पूर्वास्मिन्यांसवपरस्मिन्साधनं गता। अस्यार्थः। संदर्शनं फलविषयः संकल्पः। न प्रार्थनायां फलोपायविषये
पि प्रापिका धनं व्यवसायः क्रियाविशेषस्य फलसाधनत्वप्राकट्यकर्मत्वम्। रुच्यर्थानां धातूनां योगे रुचिविषयीभूतः सजनप्रीतिमान्
र्थोपि संप्रदानमिति सार्थकम्। अर्थानां प्रीयमाणः। इत्यनुशासनात्। रुच्येशो चैत्र भक्तिरित्यादौ संप्रदानसंज्ञा। समवायसंबंधेन रुच्याश्रिताविनि
विषया प्रीतिरित्युक्तौ भक्तिनिष्ठा आधार इति बोधः। अध्यपवादत्वादाश्रितत्वरूपः संबंधः। चतुर्थ्यर्थो विषयतारूपफलतावच्छेदकं

वंधेन प्रतिहसमानाधिकरणो व्यापारो रुचेरर्थः। तथा चाकर्मकोयं। एवं च प्रीत्यर्पणइति क्रियादेश्चुरदेवा जिघ्रतेश्च योगेन तयोः सकर्मक
त्वेन रुच्यर्थत्वाभावात्। तथा च भक्तिर्हरिं प्रीणयति हरिर्भक्तिं जिघ्रतीत्यादयः प्रयोगाः। अत एवान्यकर्तृकोऽभिलाषो रुचिरिति हरदत्तः। तत्स्वा
र्थः। अभिलषति कर्ता हरिः। तदपेक्षया भक्तिरूपस्य कर्तृकोऽभिलाषो प्रीत्यनुकूलो व्यापारो रुचिरित्यर्थविषयकर्तृकोऽभिलाषफलि
तोर्थः। आदिलोपो चेदृस्यत्र नरीयमाण इति विशेषणाद्धामानाङ्घ्रीत्यर्थस्याग्रहणात्। यत्तु नारदाय रोचते कलह इति नारदादेर्न सं
संप्रदानत्वापत्तिः किं तु ह्यर्थानामिति सूत्रेण संबंधमात्रेण चतुर्थीति जयरामभट्टानंदप्रभृतिनाकिं कैश्चन नूतनोक्त्या ज्ञानात्। नह्यनेन चतुर्थी
विधीयतेऽपि तु संप्रदानसंज्ञेति दिक्। श्लाघह्नुङ्स्थाशपां धातूनां योगे बोधयितुमिष्टस्य संप्रदानसंज्ञाविधायकश्लाघह्नुङ्स्थाशपां ज्ञीप्स्य
मान इत्यनुशासनाद्देवदत्ताय श्लाघते ह्नुते तिष्ठते शपते वेत्यत्र संप्रदानसंज्ञायां संप्रदाने चतुर्थीति चतुर्थी। तत्र ज्ञीप्स्यमानपदे यस्मै आत्मा
यत्नतः ज्ञीप्स्यमानः अथवा यः आत्माय त्वत्सज्ञीप्स्यमान इति। आत्मा नेदः। तत्र विशेषत्वात्सख्यां वचनं। तथा चास्य कर्मकं परकर्मकं वा
देवदत्तसंबंधिश्लाघ्यत्वकथनमिति बोधः। तथा च मदिः श्लाघ्यमानः परस्त्री भ्रष्टत्वागादिह साधिप इति आत्मनं परस्त्रीभ्यः श्लाघ्यं कथयति १४

त्यर्थः। गोपी स्मरात्कृष्णाय श्लाघते इत्यत्र गोपीकर्तृका स्मरहेतुका कृष्णवृत्तिबोधविषया स्तुतिरिति बोधः। द्वितीये कृष्णं स्तौतीत्यर्थः। क
र्मत्वेऽपि भेदविवक्षया द्वितीया। ह्नुङ् अपनयने। श्लाघादिभिः स्तुत्यादिपूर्विका बोधनार्थः। तथा च कृष्णाय ह्नुते न तं बोधयती
त्यर्थः। एवं स्तुतिविशिष्टं कृष्णं स्थित्यादिना पयेन च कृष्णं बोधयतीति सर्वत्र बोधः। एवं तत्र धृङ् अवस्थाने इति धातोर्योगे तदर्थी
वस्थिताश्रयसंबंधी संप्रदानमित्यर्थके न धारेरुत्तमर्ण इत्यनुशासनेन भक्ताय धारयति मोक्षं हरिरित्यादौ संप्रदानत्वे च
तुर्थी। संबंधोत्र विभक्त्यर्थः। हरिकर्तृको भक्तसंप्रदानको मोक्षकर्मको वा कोवस्थित्यनुकूलो व्यापार इति बोधः। यद्वा तु भक्तस्य मोक्षं न्यय
स्तदा भक्तस्येति षष्ठ्येव। एवं देवदत्तस्य शतं धारयतीत्यत्र नासनेनानतिशये इच्छाविषयस्य तत्त्वेन विवक्षायां संप्रदानसंज्ञाविधानात्सु
ष्पेभ्यः स्पृहयतीत्यत्र चतुर्थी। पुष्पाणां प्राप्तायां वचनं। एकाभिलाष पुष्पसंबंधी इच्छानुकूलक्रियेति बोधः। यदा हीप्सिततमत्वेन विवक्षा
तदा पुष्पाणि स्पृहयतीति द्वितीयैव। यदा त्वीप्सितस्येप्सितत्वमस्य वा शेषत्वविवक्षा तदा षष्ठ्येव। अत एव परस्वेभ्यः स्पृहयतीति गोमाय
तिकर्मण्यनीयरकुमार्थइव किं तस्य तस्यं नित्यं स्पृहयति चेत्यादयः प्रयोगाः। मंजूषायां तु स्पृहयतेरिच्छामात्रवाची। इच्छानुकूलमनः

संयोगादिव्यापारवाचीच। फलावच्छिन्नेच्छावाचीचवा। अथ स्पृहेरीप्सितः इति संप्रदानत्वं। तत्र हि ईप्सितत्वं धात्वर्थव्यापारजन्यफला
श्रयत्वं। ननु धात्वर्थत्वात् स्पृहः फलस्य कर्मसंज्ञानुधात्वर्थफलाश्रयस्य षष्ठी प्रवारणेन संप्रदानविभक्तिः। पुष्प्यं प्रदाने च्छेति बाधः। अस्य क
र्मत्वं पुष्पाणि स्पृहयतीति। संप्रदानस्यापि तत्त्वेनाविवक्षायां षष्ठ्येव स्यात्। तत्र सकर्मकत्वं यथा समत प्रयुक्तेरीत्सव प्रयोगनिर्वाहे सर्वधातू
नां फलावच्छिन्नव्यापारवाचित्वस्य प्रसिद्धत्वेन तद्विहाय प्रबलप्रमाणाभावे स्वार्थं संप्राप्य किंचिदर्थकल्पनस्यानुचितत्वात्। यद्यपि
ऐं दृशेरवरयत्नु ईप्सितमात्र इयं संज्ञा प्रकर्षविवक्षायां तु परत्वात्कर्मत्वम्। एवं चेप्सितमात्रे ईप्सितत्वमात्रपरत्वेन विवक्षिते षष्ठ्येव। तत्र
शेषत्वेन विवक्षितत्वात् निरुक्तेप्सितत्वमात्रस्य दुर्वचत्वात् तात्पर्यकत्वेन धात्वर्थप्रधानीभूतव्यापारजन्यफलाश्रयत्वस्यैवात्र सत्त्वेन वारयति वि
लक्षण्यादिसुक्तमात्रत्वं प्रसंजनं। तथाहि पुष्पेभ्यः स्पृहयतीत्यादौ पुष्पवृत्तीच्छानुकूलैकदेवदत्ताश्रयिका सम्मनःसंयोगरूपक्रि
येत्यर्थविवक्षायां संप्रदानत्वं। यदा तु सन्तेच्छानुकूलेति विवक्षा तदा कर्मत्वमेव। यदा तु फलतावच्छेदकसंबंधस्य विषयतारूपस्यासा
मान्यरूपेण संबंधत्वेन विवक्षा तदा षष्ठी। एवमेव तंडुलं पचतीत्यादौ कर्मादीनामविवक्षिते तथा च तत्र फलतावच्छेदकसंबंधस्य वृत्तित्वं

दिरेव विशेषरूपस्य सामान्यरूपेण विवक्षायां षष्ठी तंडुलस्य पचतीति। एवं च स्पृहेरीप्सित इत्यनेन फलतावच्छेदकसंबंधेनेप्सितस्य संप्र
दानत्वमतस्यैव तु रूपान्तरेण सामान्येन संबंधत्वेन सर्वथा। एवं च शेषत्वेन वि- विवक्षातिरिक्तस्येप्सितत्वमात्रस्य दुर्वचत्वादिसपास्तम्। प्रक्ष
तेत्यादि स्वयं त्वस्तु प्रक्षेत्वनुपयोगादयुक्तम् इति दिक्। विषयमनया क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः इत्यनुशासनाद्धरये क्रुध्यति ईर्ष्यसूयतीत्यादौ
त्यादौ संप्रदानत्वेन चतुर्थी। तत्र द्वयोरकर्मकत्वात् षष्ठ्या भावात् इतरयोः कर्मसंज्ञायां बाधनं ननु क्रुधद्रुहोरुपसृष्टयोः कर्म इत्यनुशासनात् कोपस्यैव क्रोध
पर्यायत्वात्। कथं क्रोधस्य कोपमूलत्वादिति चेत्। वाक्कलहादिविकारानुमेयं हिंसादिकोपस्यैवात्र क्रोधपदार्थत्वात्। दुःखजनकक्रिया
रूपापकारजन्यस्वस्य न कस्यचित्तद्वृत्तिविशेषः। एवं चयोस्मान्द्वेष्टि। यादौ सत्ता नाभिनंदनं द्वेषरथः। तत्र बहुवचनदुःखसाधनताज्ञानजन्याप्रीतिज
न्यस्व तद्वृत्तिरोषः। एतेन क्रोधे द्रुहपदनिरादशक्तिकार्थं यदुक्तं तदपास्तम्। अत एव चित्तदोषार्थानामिति निर्णोक्तं भाष्यकृतां तेषां न कोपमूल
त्वं तदादेवदत्तस्य क्रुध्यति द्रुह्यतीदेवदत्तमीर्ष्यति असूयतीत्यत्र पिसाधुवा क्रुध्यति कर्मचिद्दित्यत्र क्रियायाग्रहणमपि निर्मितासमेन संप्रदान
त्वं। हरिं तं वंधोऽत्र यः भ्रम्यकारके च्छेति बाधः। हरिकर्मकोत्कर्षविषयकद्वेषः। तत्रेष्टगुणविषयकदोषाधिकरणमिति बाधः। अथावि

पयश्शुभाशुभपर्यालोचनार्थत्वाधीहीयोगे प्रश्नविषयसंबंधिसंप्रदानमित्यर्थः। किंनराधीक्ष्योर्यस्य विप्रश्न इत्यनेनानुशासनेन संप्रदानसं
ज्ञाविधानाद्धेतुस्माराध्यतीक्षते वेत्यत्र चतुर्थी। संबंधश्चतुर्थ्यर्थः। कस्य संबंधिप्रश्नविषयशुभाशुभपर्यालोचनानुकूलक्रियेति बो
धः। शुभाशुभकर्मणोर्धात्वर्थे निपसंग्रहाद कर्मकावेतौ। एतदेव स्पष्टमाहा कर्मकाविति गणसूत्रात्। प्रवर्तनापूर्वकाभ्युपगमार्थक
प्रत्याङ्पूर्वकश्रृणोतेर्योगे पूर्वस्य प्रवर्तनाश्रयस्य संप्रदानसंज्ञाविधायकाभ्यां प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्तेत्यनुशासनाद्विप्राय गां प्रति
शृणोति आशृणोतीत्यत्र चतुर्थी। विप्रस्य कर्तृप्रयोजकत्वेन हेतुत्वात्कर्तृत्वाद्वा तृतीयाप्राप्तौ वचनं चतुर्थ्यर्थः। आश्रयत्वं प्रवर्तनाया
श्च जन्यतासंबंधेनाश्रयेन्वयः। तथा च विप्रनिष्ठप्रवर्तनाजन्यो देवदत्तनिष्ठाभ्युपगम इति बोधः। यत्तु विप्रदत्तां मदेवदत्तो गां प्रतिश्रा
वयतीत्यत्र संवेति हरदत्तः। तच्चिंत्यं देवदत्तो विप्रं चयति मोदकमित्यपि प्रयोगापत्तेः। चेने द्वापत्तिः। ६ अर्थानामिति निरूढत्रे हेतुसंज्ञा
पत्रादिके यमिति स्वयं येनेह स्याराजग्रंथेन च विरोधात्। तस्माद्धेतुसंज्ञायाः बाधादत्र न शिजुसन्निरिति भावः। शंसितृप्रोत्साहना
र्थकानुप्रतिपूर्वकगृणातेर्योगे पूर्वस्य शंसनरूपव्यापाराश्रयस्य योनुप्रतिगृणश्चेत्यनुशासनेन संप्रदानसंज्ञाविधानाद्धोत्रेनुग ६

गृणाति प्रतिगृणाति इत्यत्र चतुर्थी। शंसितुः प्रोत्साहनं कर्म तत्रान्वयः। होत्रे अध्वर्युः शासितारेऽप्यभेदान्वयः। तथा च होतृभिन्नशंसितृ
कर्मकहर्षानुकूलो व्यापारः अध्वर्युकर्तृक इति बोधः। नियतकालं वेतनेन करणेन स्वीकाररूपपरिक्रयणे साधकतमस्य पाक्षि
कसंप्रदानसंज्ञाविधायकपरिक्रयणे संप्रदानमन्यतरस्यामित्यनुशासनेन शताय वा परिक्रीत इति अत्र संप्रदानत्वं। तथा च शततनि
ष्ठदानरूपव्यापारसाध्यदेवदत्तकर्तृकस्वीकारकर्मीभूत इति बोधः। क्रियाफलकक्रियोपपदकाप्रयुज्यमानतुमुनः कर्मणि चतुर्थी
विधायकेन क्रियार्थोपपदस्य च कर्मणि स्थानिन इत्यनुशासनेन फलेभ्यो यातीत्यादौ चतुर्थी। अत्र फलकर्मकाहरणफलकं यानमि
ति बोधः। प्रविश पिंडीमित्यादौ भक्षणार्थप्रवेशनक्रियोपपदत्वेपि पिंडास्तुमुनंतकर्मत्वाभावान्न चतुर्थी यदा तु भोक्तुमिति तुमु
नंतकर्माध्याहारस्तदा चतुर्थी भवत्येव नमुपशोकेभ्यो धूम इत्यत्र वात्रापि सकर्मकहरणनिष्ठजन्यतानिरूपकत्वसंबंधात्वनफल
स्य यानेन्वयसंभवात्तादर्थ्ये चतुर्थ्येवोपपन्नो किं सूत्रेणेति चेत् फलनिष्ठप्रकारताहरणनिष्ठविशेष्यता समानाधिकरणप्रका
रतानिरूपितविशेष्यताशालियानमिति बोधे तस्यावश्यकत्वात् कर्मत्वार्थिकेयं भाववचनाश्चेति सूत्रविहितनमुन्नामना

र्थकं यन्नन्तप्रातिपदिकात्तदर्थार्थे चतुर्थीविधायकं तुमर्थाच्च भाववचनादित्यनुशासनेन यागाय यातीत्यादौ चतुर्थी न वचनात्तादर्थ्यद्
सनेन गतार्थता तुमर्थ एव तुमर्थास्योक्तत्वेनोक्तार्थानामप्रयोग इत्यप्राप्तो विधानसामर्थ्यात् यष्टुं यातीति बोधः उपकार्योपका
रकादिरूपतादर्थ्यविवक्षायां पशुपदादौ पकार्यादिवाचकाच्चतुर्थीविधायकतादर्थ्ये चतुर्थी वाच्येति वार्त्तिकेन यूपाय दारु ब्राह्म
णाय दधीत्यादौ चतुर्थी तस्मादुपकार्यायेदं तदर्थं तस्य भावः ब्राह्मणादित्वात् ष्यञ् उपकार्योपकारकत्वरूपसंबंधश्च प्यञर्थः । कृ
त्तद्धितसमासेभ्यः संबंधाभिधानं भावप्रत्ययेनेति सिद्धान्तात् यूपनिष्ठजन्यतानिरूपितजनकताश्रयं दार्विति बोधः ब्राह्मणकर्तृ
कं भोजनोपकारकं दधीति बोधः एवं मशकेभ्यो धूम इत्यादौ अपि मशकनिवृत्त्युपकारको धूम इति बोधः यत्तु मुसन्ति वा द यूपाय दार्वि
त्यादौ न संप्रदानचतुर्थी अपितु तादर्थ्यार्थ इति सूत्रेणैव । तादर्थ्यं सर्वार्थः प्रयोजनमस्येति तत्त्वं समभिव्याहृतपदार्थतादर्थ्यवि
वक्षायां तद्वाचकाच्चतुर्थीति तदर्थः प्रयोजनं चात्र जन्यत्वं दुःखादेः पापादिजन्यतया दुःखाय पापमित्याद्यापत्तेः नापि जन्यत्वेच्छा
विषयत्वं स्वर्गादेः पुण्यादिजन्यत्वेनेच्छाविषयत्वात् स्वर्गाय पुण्यमित्याद्यापत्तेः नचेष्टापत्तिः तथा सति पक्वं यज्जनीत्यर्थे पाका १२

य व्रजनीति निर्वाहाय तुमर्थेति सूत्रप्रणयनवैयर्थ्यात् पाकादेर्निरुक्तजनतार्थत्वे तद्वाचकाच्चतुर्थ्युपपत्तेः अपितु समभि
व्याहृतपदार्थनिष्ठव्यापारेच्छानुकूलेच्छाविषयत्वं तत्प्रयोजनत्वं तत्प्रयोजनकत्वरूपतादर्थ्यं च तदिच्छाधीनेच्छाविषयव्यापा
राश्रयत्वं दारुणो यूपेच्छाधीनेच्छाविषयतक्षणादिरूपव्यापारवत्तया यूपार्थत्वमिति तन्नहि वक्ष्यमाणपदाच्चतुर्थी इच्छाधीने
च्छाविषयव्यापारस्तु दुःखाय पापादिः पुण्यादेः स्वर्गेच्छाधीनेच्छाविषयत्वेन तदनुकूलव्यापाराश्रयतया न स्वर्गाय पुण्यमित्याद्
यः प्रयोगाः व्रजनादेः पाकानुकूलव्यापाराश्रयतया न पाकाय व्रजतीत्यादावनेन चतुर्थीति तुमर्थाच्चेति सूत्रमिति गदाध
रभट्टाचार्यैरुक्तं तद्व्याकरणज्ञानमूलकं तथाहि आदौ वार्त्तिकसूत्रत्वभ्रमः दुःखाय पापं स्वर्गाय पुण्यमित्यादिप्रयोगाणां
सूत्रवार्त्तिकभाष्यकृन्मतानामसाधुत्वभ्रमः तथा क्रियार्थक्रियोपपदविहिततुमर्थ एव तादर्थ्यस्योक्तत्वेन तादर्थ्ये चतुर्थ्यप्राप्तौ
तुमर्थाच्चेति सूत्रस्य सार्थकत्वेऽपि तद्व्यर्थत्वभ्रमः चैत्राश्रिततक्षणादिरूपव्यापारजन्यफलाश्रयत्वस्य दारुणि व्यापाराश्र
यत्वभ्रमः यदि फलेऽपि व्यापारपदता तर्हि यूपाय दारु तक्षतीति चैत्र इत्यादावपि स्वर्गाय पुण्यं करोति चैत्र इत्यादावपि फल

म

हृप व्यापारः। अथ स्पर्द्धमर्हं मतत्वात् साधुत्वापत्त्यभवदुक्तसाधुत्वं न स्यात्। किं च भवन्मते अध्ययनाय व्रजती त्यादौ अपि त्वध्ययनाप
त्तेः। व्रजनादेः रध्ययनानुकूलव्यापारतया अथ तया भवदुक्ततादर्थ्याभावेन चतुर्थीति चेन्न। हिंयागाय यात्ये त्यत्रापि यागप्राप्ति
अध्ययनं यकर्तृ व्रजती त्यर्थे क्रियार्थीं क्रियार्थोपपदे ति चतुर्थीति चेन्न। हिंयागाय याती त्यत्रापि यागं याती त्यर्थे चतुर्थ्यु
पपन्नौ सूत्र वैयर्थ्यमिति दिक्। मन्यकर्मणि ... तिकाक अनधुक शृगालमित्र तिरस्कारस्य व्यंजकेन तेदानादिकस्य मन्यतेः कर्म
णि तिरस्कारे विभाषा चतुर्थी विधायके न मन्यकर्मण्यनादरे विभाषा ... प्राणिषी त्यनेन न त्वां तृणं तृणाय वा मन्य इत्यादौ
प्राप्तिकी चतुर्थी। अत्रोक्तस्य स्यापकृष्टेनाप्युपमानाभाव रूपः तिरस्कारः। एवं च नत्वां शुक्ल त्वं तृणसदृशप्रकारक मद्विज्ञा
नाभाव इति बोधः। तृणाय मत्वा रघुनंदनाय इत्यादौ अपकृष्टेनोपमान रूप तिरस्कारः। तृणमिव मत्वेत्यर्थः। गत्रा त्मा भिसंधेव शाह
पगत्यर्थकर्मणि द्वितीयापवाद द्वितीया चतुर्थी विधायकं वा याती त्यादौ द्वितीया चतुर्थ्यौ चेष्टायामनध्वनीत्यनेनानुशासनेनया
मं ग्रामाय वा याती त्यादौ द्वितीया चतुर्थ्यौ त्रियंग-कर्ता स्त्र नात्संप्राप्त्य विवक्षायां त्विष्टापत्तिः। न थंतेरगत्यर्थत्वादत्रोनय ५९

ती त्यत्रापि न। मनु कर्मणि द्वितीयाविधानं व्यर्थं मन्यकर्मण्यनादरे इत्यस्यानंतरं गत्यर्थकर्मणीति पठित्वा चतुर्थीविकल्पवि
धानेनापि पक्षे द्वितीयासिद्धेः। न च ग्रामं गंतेत्यादौ कृद्योगषष्ठीबाधनार्थं तदिति वा अमात् सूत्रप्रत्याख्यानपरेण भाष्येण तत्र षष्ठ्या
एव साधुत्वबोधनात्तथात्वात्। अथाह जलसंदर्शनादिक्रियाभिराप्यमानत्वात् कर्मणि गमनेनाभिप्रेयमाणस्य ग्रामस्य संप्रदा
नत्वाच्चतुर्थी प्रसंगः। अन्नाहाहारस्तदा गमनस्य कर्मत्वाद्ग्रामस्य कर्मत्वे द्वितीया भवति। एवं हि वदता कृद्योगषष्ठ्यपि दृष्यते। अ
तएव ग्रामं गामीति अकेनोरिति सूत्रे भाष्ये उक्तम्। एवं चोद्यमतः ग्रामादिदृश्यकोत्तरदेशसंयोगानुकूलव्यापारविषयकं इत्यान्ना
दिति बोधः। सूत्रमंतु ग्रामकर्मकं ध्यानमिति बोधः। उत्सत्रिरूपछुत्त्यर्थवाचकधातुयोगकार्यकारणयोर्भेदविवक्षायां कारणस्य
कार्यत्वेनापरिणामविवक्षायां कार्यवाचकात्सप्तम्यादि चतुर्थी विधायक क्लृपि संपद्यमाने चेत्यनेन भक्तिर्ज्ञानाय कल्पते संपद्य
ते जायते वेत्यत्र चतुर्थी भक्तिकर्तृका ज्ञानसंबंधि न्युत्पत्तिरिति बोधः। अभेदे तु प्रथमा एवा भक्तिर्ज्ञानमिति। हेतुत्वविवक्षायां तु जात
कर्तुरित्यपादानत्वात्पंचमी भक्तेर्ज्ञानमिति। न च तादर्थ्य चतुर्थ्या गतार्थपरिणामत्वेन बोधस्य विवक्षितत्वात्। भक्तिर्ज्ञाना योना

परिणमनदृश्यत्वात्पशाद्वस्त्वादूनिधर्मपरः॥ज्ञानत्वविशिष्टरूपांतरप्राप्तिर्भक्तिः कर्तृके स्यर्थः॥एवंच विकारवाचकाभावात्च
र्थी॥यत्तु शब्देंदुशेखरे प्रकृतिविकृतिभेदविवक्षामनेन विकृतिवाचका चतुर्थी॥अभेदविवक्षायां कर्तृत्वात्प्रथमेवा परत्वा
त्॥विस्तरस्तु मंजूषायां॥इष्टमद्रसुक्तमा मंजूषायां तु प्रथमापवादोत्र क्लृप्तिसंपद्यमाने चेत्यनेन विकारवाचका चतुर्थी प्रकृ
तिविकृत्योर्भेदविवक्षायां तु प्रकृतिभाग्वास्त्रीतिर्जीनेक तुरित्यपादानत्वेन भक्तिपदात्पंचमी भक्तेर्दानं कस्मेनेदात्॥ज्ञानेन
कर्तृत्वेन कारकविभक्तेर्बलवत्त्वेन चततः प्रथमेति कष्यटस्येष्टमित्याद्युक्तम्॥तत्परस्परविरोधादसंगतमिति सुधीभिर्वि
रूढ्यम्॥नागानां सुभास्त्रभस्तुचक्रभूतविकाररूपोत्सातत्ता प्येर्थेवर्तमानात्संबंधबोधकषष्ठ्यपवादचतुर्थी विधायकोन्यो
तनन्नापितेत्यनुशासनेन वातायकपिलाविद्युदिति॥ अदोचतुर्थ्येवातदर्थिकाकपिलाविद्युदिति बोधः॥इष्टसाधनरू
पार्थहितशब्दयोगे तस्मै हितं चतुर्थी तदर्थार्थबलिहितसुखरक्षितैरित्यादिज्ञापकसिद्धहितयोगे चेत्यनुशासनेन ब्राह्मणाय
हितमित्यादौ षष्ठ्यपवादत्वेन चतुर्थी विप्रसंबंधीष्टसाधनमिति बोधः॥एवं सुखयोगेपि ब्राह्मणाय सुखमित्या १९

दौ॥नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्चेत्यनेन षष्ठ्यपवादचतुर्थीविधानात्प्रयुक्तेनमइत्यादौ चतुर्थी॥हर्षविषयकस्वनिष्ठापकर्षबोध
नानुकूलो व्यापार इति बोधः॥एवंशर्मणेः॥शिवायनमइत्यादौ स्वगोनमः॥श्रद्धार्थयः शिवदिष्टयकत्यागविषयो भवति इति बोधः॥प्रजाभ्यः
स्वस्तित्यादौ स्वस्तिशब्दो मंगलार्थः प्रजासंबंधिमंगलमिति बोधः॥स्वस्त्यस्तु गोभ्य इत्यादौ चतुर्थ्येवाशिषीति परामपि पादिकषष्ठीं
बाधित्वा पुनर्विधानार्थकचकारात्चतुर्थ्येव॥आशंसाविषयगोसंबंधि इत्यादौ चतुर्थी वाशिषीति परामपि संबंधिमंगलकर्तृकं भवतापि
ति बोधः॥अग्नये स्वाहा स्वधा वषडित्यादावपुपदेश्यकत्यागइति बोधः॥स्वाहादीनां त्यागार्थकत्वात्॥अलमिति पर्याप्त्यर्थग्र
हणं न भूषणार्थस्य व्याख्यानात्तेनेदैत्येभ्यो हरिरलं प्रभुः समर्थः शक्त इत्यादौ दैत्यमारणसंबंधिसामर्थ्यवानिति बोधः॥सर्वेषांपा
मालिनिमादि निर्देशात्प्रभ्वादियोगे षष्ठ्यपि साधुः॥ननु नमस्करोति देवानित्युपपदविभक्तेः कारकविभक्तिर्बलीयसीत्यनेन नमस्करोति
देवेभ्यः॥एवमाय नमस्कुर्यादिति प्रयोगे द्वितीया दिति चे अत्र देवा अभ्रादयिनु मित्सर्थविवक्षायां क्रियार्थोपपदस्येत्यादिना चतु
र्थी॥कर्मणः शेषत्वविवक्षायां अनेन चतुर्थी॥यत्तु मंजूषायामुद्देश्यस्य संबंधत्वेन विवक्षायां षष्ठीपि रित्युक्तं॥तदसत् नमःस्वस्तीत्यस

३० षष्ठ्यपवादकत्वात्। इति प्राहुः॥ ॥स्वाभाविकबुद्धिकल्पितान्यतरसंयोगपूर्वकविभागाश्रयत्वे सति तद्विभागजनकक्रियानाश्रयत्व
रूपस्य क्रियान्वयायां ध्रुवस्य ध्रुवमपायेऽपादानमिति सूत्रेणापादानसंज्ञाविधानात्। वृक्षात्पर्णं पतति धावतोऽश्वात्सति कुपतोऽश्वात्सतोऽश्वाद्वा पतत्यश्व
ऊष्ठाश्वादीनां निरुक्तध्रुवत्वसत्त्वादपादानत्वमिति पंचमी। वृक्षापादानिकापर्णकर्तृकाऽधोदेशसंयोगानुकूला क्रियेति बोधः। एवं च वृ
क्षे एवं पर्णे भूमिसंयोगेऽधोदेशसंयोगानुकूलक्रियासत्वेपि विभागाश्रयत्वाभावान्न वृक्षस्यापादानत्वं। धावनकर्त्रभिन्नाश्वापादानकं देवद
त्तकर्तृकापतनक्रियेति बोधः। अत्राश्वस्य धावनक्रियाश्रयत्वेपि विभागजनकपातक्रियानाश्रयत्वादपादानत्वं। ऊष्ठ्यापादानकपातकर्त्र
भिन्नाश्वापादानिकं देवदत्तकर्तृका पातक्रियेति बोधः। अत्राश्रयभेदात्क्रियाभेदं परिकल्प्याश्वस्य पातक्रियाश्रयत्वेपि देवदत्तकर्तृकपात
क्रियानाश्रयत्वादश्वस्यापादानत्वं। परस्परस्मान्मेषावपसरत इत्यत्र मेषापादानिकान्यतरमेषकर्तृकापसरणक्रियेति बोधः।
एवं वृक्षात्स्यन्दते रज्ज्वाचलितरज्ज्वादौ नामपि साधुत्वं। स्यन्दतेर्विभागार्थत्वेनुवृक्षे स्यन्दत इति प्रयोगः। वृक्षं त्यजतीत्यादौ तु कर्मसंज्ञया
बाधान्नापादानत्वं। अपादानत्वं चावधेरुपाधिः। भूयसा द्विविधं तत्संज्ञावत्वं वा निष्प्रायिकास्तु अपादानत्वं त्वनिष्टभेदप्रयोगितावच्छेदकी ३०

भूतक्रियाजन्यविभागाश्रयत्वं। एवं च वृक्षनिष्ठभेदप्रतियोगितावच्छेदकतद्विभागजनकपतनाश्रयं पर्णमित्यन्वयधीः। वृक्षवृत्ति
विभागजनकवृक्षवृत्त्यन्योन्याभावप्रतियोगितावच्छेदकपतनाश्रयः पर्णमित्यन्वयधीर्वा। अत्र विभागोद्देश्यकं पंचम्यर्थः। तत्र धात्व
र्थतावच्छेदकत्वेन विभागो विशेष्यः। तेन वृक्षं त्यजति खग इत्यादौ वृक्षस्यापादानत्वमिति वदंति। तन्न। अतो वृक्षाद्विभजत इत्यादौ वि
धावृत्तिः प्रसंगः। वृक्षं त्यजतीत्यस्य पाणोकर्मसंज्ञया बाधादेवोपपत्तौ तदर्थे विभागधात्वर्थानवच्छेदकत्वे रूपविशेषणं वैयर्थ्यं च।
न च त्रिविधं निर्दिष्टविषयं उपात्तविषयं अपेक्षितक्रियं चेति। साहापादानं गतिनिर्दिष्टे आद्यं यथाश्वात्पततीति। कालत्रार्थ
गं स्वांगस्य धात्वर्थानुगत तदुपात्तविषयं। यथा वलाहकाद्विद्योतते विद्युत् स्वांगे विद्योतनेन निर्वर्त्तेन। अपेक्षितक्रियं तु तत्र यत्र
साकांक्षभागमनं पश्यनिधाय पृच्छति कुतो भवानिति पाटलिपुत्रादिति चोत्तरयति। जुगुप्साविरामप्रमादार्थानामुपसंख्या
नमिति सूत्रेणैतदर्थकानां धातूनां कारकस्य जुगुप्सनार्थकस्यापादानसंज्ञाविधानात् धर्माज्जुगुप्सते विरमति प्रमाद्य
ति चेत्यत्र पंचमी। अत्र पंचम्या हेत्वर्थः। तत्र पंचम्यर्थस्य विषयत्वेन तस्य निवृत्तिरूपधात्वर्थजन्यत्वेनान्वयः। तथा चर्मणो वदे

पत्रन्यविनिवृत्तिमानितिबोधः॥ विषयत्वं पंचम्यर्थः। विधर्मविषयकनिवृत्तिमानिति च गर्हापूर्वकनिवृत्तिर्जुगुप्सार्थः। तत्र
गर्हानिवृत्त्योः क्रमेणान्वयः। तथा च पापविषयकगर्हाप्रयुक्तपापागोचरविनिवृत्तिमानिति बोधः। अनिष्टसाधनताज्ञानपूर्वकनिंदा
वा जुगुप्सेत्यर्थः। विषयत्वं सुप्यर्थः। तथा च पापविषयकानिष्टसाधनताज्ञानपूर्वकनिंदेत्यर्थः। विषयता पंचम्यर्थः। करणानंतरमिक
रकं विरामार्थः। आख्यातार्थाश्रयत्वं पंचम्यर्थस्य च निद्राकोऽन्वयः। तथा च धर्मविषयककृत्यनंतरकालीनाधर्मविषयक
कृत्याभावाश्रयत्वम्। अनवधानं प्रमादार्थः। अधर्मविषयकानवधानाश्रयः। एवं यथासंभवं बोधं वदन्ति। भाष्यरीत्या तु अधर्मापधा
निका निंदापूर्विका निवृत्तिः। एवं सर्वत्र भाष्यमते बोध्यः। अपादानस्य संबंधत्वेन विवक्षायां तु षष्ठी अनभिधानात्। अनिष्टचिं
तनानिष्टपरिहाररूपभीत्रार्थकधातुयोगे निष्टहेतोरपादानसंज्ञाविधायकानुशासनेन भीत्रार्थानां भयहेतुरित्यनेन चोरादीनाम
पादानत्वाव्याप्तिः इति वार्यते तेन चौरपंचमी। चौरापादानकमनिष्टचिंतनं तत्परिहारो वा निवाधः। भाष्यरीत्या तु बुद्धिप्राप्तचौरापा
दानिका तद्भयपूर्विका निवृत्तिः। तदपादानिकानिष्टपरिहारफलिका निवर्तनेति वा बोधः। एतद्धि पंचम्यर्थे हेतुत्वापादानत्वविवक्षायां च ३१

ष्ठी भवत्येवेति बोध्यमिति वैयाकरणाः। तत्कौस्तुभादिके लेखेऽयं विरुद्धं। तथाहि कस्यचिन्मते देवाश्चं ज्ञानेरोषस्य संयुगर
स्यत्रकर्थषष्ठी स्यातां क्य संयुगेन विशेषणात् षष्ठी सैनिसमाहितं। तस्माद्धेतुत्वेनाविवक्षायामपि वस्तुगत्या यो हेतुस्तस्यानेनापा
दानसंज्ञाविधानाद्धेतुतृतीयाषष्ठ्योरपवादिका पंचमी। अन्यथा हेतुत्वापादानत्वयोरविवक्षयैव सिद्धौ तावदनुधावनं व्यर्थमेव स्यात्
यद्यपि पापस्य जुगुप्सा तत्र सुकं रा चेद्दुरोरवेत् तदप्यसमंजसमेव फलभेदे स्वारस्यानां संभवात्। वार्तिकरीत्या तत्र पक्षभावे निर्णि
ते भाष्यमते त्वपवादिकात्वाभिधानस्येव शरणीकरणीयत्वात्। फलभेदाभावेन भाष्यीयपक्षत्राच। यथा आनस्यानुचितत्वात् तां सेवापि भाष्यका
रैस्तथा आख्यातत्वाच्चायत्नं भवानेदहरुकं पंचम्या हेतुत्वमर्थः। धात्वर्थो यथायथं भयं भया भावश्चार्थः पंचम्यर्थः। हेतुत्वं धात्वर्थे भयेऽन्वयेता
त्वर्थत्वावच्छेदके वा भये वेति। आख्यातार्थश्चाश्रयत्वं परिणामुत्वा कृत्यापारश्चाइस्य चेद्धेतुपंचम्येवोपपत्तौ पृथक्सूत्रप्रणयनं त
न्नस्येवप्रपंचार्थमिति। तथा च भयहेतुकभयाश्रयः। शत्रुहेतुकभयानुकूलव्यापारवानिति वान्वयधीरिति। ननु हेतुपंचमीविधायका
नुशासनाभावात् विभाषेतियोगविभागस्या गतिकगतित्वात् गुणातिरिक्तहेतोः पंचम्यनुशासनविरहादिति चेन्न अनिकर्तुरिति

सहत्यस्त्वोत्तरग्रंथविरोधाद्व्यापारापूर्वस्य जयतेः प्रयोगे असह्यार्थस्यापादानसंज्ञाविधायक पराजेरसोढ इत्यनुशासनेनाध्ययनात्
पराजयते इत्यादावपादानसंज्ञाविधानात् पंचमी॥ अध्ययनसंबंधिनी ग्लानिरित्यर्थः। भाष्यरीत्या तु अध्ययनापादानिका निवृत्तिरित्यर्थः।
केचित्तु असह्यस्तत्वधी समानाधिकरणस्तद्विषयको सार्द्धभावो धात्वर्थः। विषयोऽत्रापादानं अध्ययनापादानकादि वदन्त कर्तृकः।
उक्तार्थेऽपि हि वृद्धिनिरोधः। ससूर्यिका निवृत्तिरित्यत्र। पराजयतः सत्त्रनिराकरणानुकूलव्यापाररूपवारणार्थकधातुयोगे तत्क्रि
याया फलभागित्वाभावात् तत्क्रियाकर्तुरीप्सितापादानमिति सर्थकाद्वारणार्थानामीप्सित इत्यपादानत्वेना यवेभ्यो गां वारयती। सत्र
यवानामपादानत्वात् पंचमी। तथा च यवकर्तृकसंयोगिक विनाशानुकूलो भक्षणादिरूपो व्यापारस्तस्य गोवृत्तित्वे भावस्तदनुकूलो व्या
पारो हि परत्र वृत्तिरिति बोधः। एवं पुष्पेभ्यो आतपं वारयति। परत्वेभ्यः पाणिं वारयति। इत्यादौ पुष्पवृत्तिशुष्कीभावानुकूलव्यापाराभा
वो यः। आतपनिष्ठस्तदनुकूल इत्यादिबोधः। पत्वृत्तिसंयोगानुकूलो व्यापाराभावो यः पाणिनिष्ठस्तदनुकूल इत्यादि भाव्यं।
कूपादंधं वारयती। सत्र कूपवृत्तिर्यदंधः अंधेऽपि विच्छिन्नसंयोगानुकूलं क्रियारूपं पतनं तदनुकूलो यो अंधवृत्तिव्यापारस्तस्याभा ३२

भावस्तदनुकूलो व्यापारोऽंधवृत्तिरिति बोधः। एवमग्नेर्माणवकं वारयती। अत्राग्निजन्यदाहानुकूलव्यापाराभावानुकूल इत्यादि भाव्यं।
इत्यननुगमो वा पंचम्यर्थः। वारयत्यर्थश्चानुभवानुरोधेनाननुगतस्यादोषत्वादिति वदंति। अन्ये तु उत्तरदेशसंयोगजनकव्यापाराभाव
श्च कर्मकारकवृत्तेरनुकूलो व्यापारः स एव धात्वर्थः। वृत्तित्वं पंचम्यर्थः। इत्याहुः। तत्र यवेभ्यो गोसंयोगं वारयतीत्यनुपपन्नः।
यत्तु मुसलं ति वारयत्यत्र चैत्रादेर्नान्तरीयकतया विषभोजनं प्रसक्तं न तु स्वेच्छातस्तत्र बहूनां विरोधिव्यापारकर्तृत्वेऽपि विषाद्वारय
इत्यादिर्न प्रयोगः। अपि तु सविषाद्वारयतीत्यादिरवनत्वपूर्वप्रयोगवारणाय सूत्रकृतेप्सितमित्यत्र सम्यगुपेत्य अपादानादित्या
युक्तं न तु कूपादंधं वारयतीत्यत्रापि तु अंधं नान्तरीयकं विषभक्षणं तथा तत्र कूपपतनमपि नान्तरीयकमेव। एवं च तत्रा
पि सकूपादंधाद्वारयतीत्येव प्रयोगः स्यात् न तु कूपादंधं वारयतीति यदि स प्रयोगः प्रामाणिकस्तदा तत्रापि चैत्रं विषाद्वारयतीत्य
त्र प्रयोगः। विषस्य विषत्वेन इच्छाविषयत्वाभावेऽपि भक्ष्यत्वेन इच्छाविषयत्ववत् कूपस्य कूपत्वेन इच्छाविषयत्वाभावेऽपि देशत्वेन इच्छाविष
यत्वस्यानुभवात्। वस्तुतस्तु वारणार्थकधात्वनुकूलत्वस्यावश्यकत्वेन लाघवात् ननु पुष्पेभ्यः आतपं वारयतीत्यादावातपस्याचेतनत्वात् कथं कथं पु

ष्यमीप्सितमिति चेन्न। निवार्यनिवारकान्यतरस्येप्सितमिति व्याख्यानात्। तथा च धात्वर्थतावच्छेदकीभूतस्य विनाशाद्यनुकूलव्यापार
भावरूपस्य यत्फलं विनाशादि तत्संबंधित्वेन प्रसक्तस्य वारेप्सितत्वेन निवारकेच्छाविषय इति न कश्चिद्दोषः। व्यवधाने सति यत्कर्तृ
कात्मकर्मकदर्शनाभावमिच्छति तत्कारकमपादानमित्यर्थकेनान्तर्धौ येनादर्शनमिच्छतीत्यनुशासनेनापादानसंज्ञाविधानात् मातुर्नि
लीयते कृष्ण इत्यादावपादानत्वात्पंचमी। मात्रपादानककृष्णकर्तृकदर्शनानुकूलत्वाभाव× व्यापार इति बोधः। अन्तेनु अन्यत्र प्रसक्ताभा
वेच्छापूर्वकप्रसक्तिविरोधिव्यापारो धात्वर्थः। वृत्तिस्तंपंचम्यर्थः। धात्वर्थतावच्छेदकप्रसक्तिविरोधित्वं तज्जनकलौकिकसंनिकर्षाभावा
नुकूलत्वात् वृत्तिराश्रयत्वाभार्थः। तथा च मात्रवृत्तिस्वविषयकप्रसक्त्यभावेच्छापूर्वकः प्रसक्तिजनकसंनिकर्षाभावानुकूलव्यापारस्तदनुकू
लावृत्तिः। कृष्णनिष्ठ इति बोधः। आख्यातुः नियमपूर्वकविद्यास्वीकारे वक्तापादानसंज्ञा इत्यर्थकेनाख्यातोपयोगे इत्यनुशासनेन पंडितात् पुराणं
शृणोतीत्युपाध्यायादधीत इत्यादावपादानत्वात्पंचमी। पंडितापादानकपुराणकर्मकं श्रवणं चैत्रवृत्तिरिति बोधः। जायमानस्यापादानस्य
धारणोपादानमित्यर्थके जनिकर्तुः प्रकृतिरित्यनुशासनेन ब्रह्मणः प्रजाः प्रजायन्त इत्यत्रापादानसंज्ञाविधानात्पंचमी। भाष्यमतनुद्वेनुश ३३

षेनोपादानमेव गृह्यते। अन्यथा पितृत्वापादानिका प्रजाकर्तृको सन्निरिति विरोधः। आश्रयतेनेवमादिभूतानि जायन्ते इत्यादौ समानशब्दे पि अ
हंभवबद्ध्यामिति सामानाधिकरण्येन छागो वा मंत्रवर्णादिति वत्। उपादानरूपो विशेषो बोध्यः। अर्थबहुत्वेनाद्भुत्वं तयोर्गेपि अंशांशगा सं
भवतीति यथा। भूकर्तुः प्रभवः आद्यहृदिसंयोगः सोपादानमित्यर्थकेन भुवः प्रभवः इत्यनेन हिमवतो गंगा प्रभवतीत्यादावपादानत्वात्पंच
मी। हिमवत्समवायसंयोगध्वंसाव्यवहितोत्तरक्षणवृत्त्याद्यपृथिवीसंयोगाश्रयनावजी गंगेति बोधः। वैकुण्ठात्काशीतो वा गंगा प्रभवतीति प्रयोग
वारणाय अव्यवहितेति आधिक्येन वैकुंठसंयोगध्वंसाव्यवहितोत्तरक्षणावच्छिन्नपृथिवीसंयोगधस्य काशीसंयोगध्वंसाव्यवहितोत्तरक्षणे चाप्यस्याभावात्। वाल्मी
कायाःसवयतिधनुः खंडमाखंडरहस्यांदोवाच्या। कोयादृद्देशोवहिः पदार्थकल्मीकः सानुपामेयः। यत्तु इंडाश्चइत्यत्रेहनाविनिमहत्त्वपंचमी।
तिप्रयाणदेहकेनानेहतो विनिमहत्त्वपंचम्यविधानात्। प्रकृतेनपंचमीतु जनिकर्तुः प्रकृतिरिति सूत्रेणविभाषितयोगविभागेन वा। सर्वत्र विशि
ष्यार्थानुक्तौ सर्वत्रार्थे के चित्तु धातोः प्रकाशार्थः। पंचम्याधिकरणं तथा च हिमवति प्रथमप्रकाश इत्यर्थः। भाष्येनुवृद्धिपरिकः। सेन मयायमा
विसमिन्नार्थानामित्यादिसूत्राणि प्रत्याख्यातानि। अनेन सर्वत्रावधिः पंचम्यर्थः। आधाहारादिना गम्यमानप्रवर्तनार्थस्य कर्मणि अधिकरणे वा

पंचमीविधायकेन ल्यब्लोपे कर्मण्यधिकरणे चेत्यनेन प्रासादात्प्रेक्षते आसनात्प्रेक्षते इत्यादौ पंचमी ॥ प्रासादमारुह्य आसने उपविश्येत्यर्थः ।
एवं स्थिते ल्यपि कर्माधिकरणं वा पंचम्यर्थः । यतश्चाध्वकालनिर्माणं तत्र पंचमी तद्युक्तादध्वनः प्रथमासप्तम्यौ कालात्सप्तमी च वक्तव्ये इति अनु
शासनेन वनाद्ग्रामो योजने योजनं वा । कार्त्तिक्या आग्रहायणी मासे इत्यादौ विभक्तिः । अत्रावधिः पंचम्यर्थः । वनावधिकयोजनपरिमितदेशवृ
त्तिग्राम इति बोधः । प्रथमार्थोऽप्यधिकरणं भवेन्निकेचित् । अन्ये तु अवच्छिन्नत्वं पंचम्यर्थः । स्वावच्छिन्नत्वप्रयुक्तत्वं प्रथमासप्तम्योरर्थः ।
एवं च वनावच्छिन्नो योजनावच्छिन्नो देशवृत्तिर्ग्राम इति बोधमाहुः । वस्तुतस्तु वनसंबंधियोजनसंबंधी ग्राम इति बोधः । एवं चपञ्चमप
वादभूतेयं । अन्ये तु योजनमित्यस्य प्रथमान्तत्वेऽगतत्वे चेदृशो विशेष इत्याहुः । एवं कार्त्तिक्या आग्रहायणी मास इत्यत्र कार्त्तिक्यवधिकत्रिंशत्तिथ्यात्मकमासावच्छि
न्नोत्तरकालवृत्ति आग्रहायणीति बोधः । अन्ये तु ततः प्रभृति गते मासे आग्रहायणीति बोधमाहुः । अन्यार्थके आरादितरर्ते दिक्शब्दाञ्
चूत्तरपद आच् आहि इत्येतेषां योगे पंचमीविधायकेनान्यारादितरर्ते दिक्शब्दाञ्चूत्तरपदाजाहियुक्ते इत्यनुशासनेनान्यो भिन्न इतरो विलक्षणः अ
र्थान्तरं चेत्यादौ पंचमी । अस्याः प्रतियोगित्वं पंचम्यर्थः । प्रतियोगिकभेदवानिति बोधः । तत्रार्थकग्रहणात् ३८

णं अर्थमिति चैत्राद्विशेषणीभूतभेदार्थकयोगेऽपि विधानार्थमदावश्यकत्वात् । अन्यथा अन्यार्थस्य भेदवदर्थकत्वेन भेदार्थकयोगेन स्यात् ।
तथा च घटाद्दृढे वैलक्षण्यमर्थान्तरत्वं वा घटस्येति प्रयोगेन स्यात् इतरग्रहणं प्रपंचार्थमिदन्तोऽप्ययमेवाशयः । न चैवं घटान्यपदार्थकरणे च
स्यादिति वाच्यं ज्ञानकत्वेन भेदार्थकत्वाभावात् । घटादेकदेशादौ लिङ्गभेदस्यान्यार्थकत्वेनापत्तिः । यत्तु मुख्ये सन्निधाने अन्यतरयोऽभिह
पात्वमेवार्थपरत्वेनाभिधानेऽकः घटात्पट इति च स्यादिति । घटाद्भिन्नः घटाद्भिन्न इत्यादावपादाने पंचमी । भिन्नधातोरन्यान्योन्याभावार्थः । घटा
द्भिन्नमिति प्रयोगापत्तिः ॥ भिद्यते इत्यस्य योगानापत्तेश्च कर्तृरियेग मनेपरसंभवात् । अवैदिकावनस्य संभवः । पाश्चैपरित्यागे च अकर्म
कधातुयोगे कर्मकर्तृविवक्षया अप्यसंभवादित्युक्तौ नैरवानुप्रसक्तेर्याकारणेन भेदपीनरग्रहणं अपंचार्थमिति भाष्यानुक्तत्वादिति
रग्रहणं चायुक्तमित्युक्तं । नरसपंजसंभाष्यानुक्तत्वेन मकआरम्भानुयंथविरोधेनान्यथाप्रयोगसाधनस्यानुचितत्वात् । नहि सर्वभाष्येषु
वक्तुं हृदं चेणो वा अतः । विनरविधौ न सकलग्रंथसकलग्रंथसंमतस्य भाष्यालिप्रनत्वान्नुमानाभावात् । नन्वार्थपरत्वपूर्वोक्तदोषः । घटादेक
इत्यादौ लिंगापत्तिः । घटात्वरस्यन्तनुनन्तकस्यान्यार्थत्वाभावः । घटाद्भिन्नत्वेत्यादावपादानपंचमी चेत्सर्वत्रबुद्धिपरिकल्पितापादानत्व

त्वाद्रूपत्वेनैवषष्ठ्यर्थसंबंधत्वेन विवक्षायां घटस्यपि चैत्र इति प्रयोगापत्तिश्च निरस्ता तोः सकर्मकत्वेन सिद्धत्वेनति प्रयोगोपत्तिपश्चनिरिक्तायत्तुपृ
थक्त्वं गुणः। नान्योन्याभावः। अन्यथा न्यायादि स्वेव सिद्धे पृथग्विनेति पंचमी विधानं व्यर्थं स्यादिति चेत् किं कैः। तद्रूपत्वानाता पृथक्त्वा वस्या
न्योन्याभावार्थकत्वेपि पंचमी द्वितीया तृतीया विधानार्थं तत्र पादस्य सार्थक्यात् तस्मात् पृथक्त्वं न गुणः। किंतु अन्योन्याभावः। अतः पृथ
गात्पृथगित्यादि संगच्छते। यथा गुणे गुणानंगीकारे संगतं न स्यात्। एतेन दशमात्रोपयत्न न पुस्त्वमित्यत्र संताभावो एतेषांमर्थः। एतस्मिन्नप्रति
योगिकसंताभावप्रयोजनः पुरुषकर्तृकी संताभावइतिबोधः। अथवा दशमात्रादत्पतेर्क्रिपादस्य निर्योगिकत्वमर्थः। एतद्योगेनान्यत्रा
पि दशमतरइति द्वितीयापि। एतेनवानं तदृक्षः पतितः। वानताभाववान्वृक्षः पतनाश्रय इति बोधः। एवं पुरुषात्त्यनपूर्वमपि। अपादानादित्यत्रा
वनप्रतियोगिकसमीपत्वतरत्व वा न्यायामइति बोधः। हृगनिकार्थेतिषष्ठ्यान्अनेनवाधः। पूर्वोग्रामादित्यत्र ग्रामावधिकोदयाचलसंनि
हितदेशावत्त्वानितिबोधः। चैत्रात्पूर्वः फाल्गुनइत्यादौ चैत्रावधिकपूर्वकालवृत्तिः फाल्गुनइति बोधः। नन्वत्र पूर्वादिशब्दानां देशकालवृ
त्तित्वेन दिग्वाचकताभावात्कथमत्र पंचमीति चेन्नादिशिदृष्टः शब्दः इति सूत्रस्यासंप्रसदिग्वृत्तित्वेपि भवति। अत्र आरभ्मानादिविशेषणदाएवनपृ ३५

ह्यं नेनेनेंद्रादियोगेन केचित्पुराणक्ष्यहणादूर्ध्वरेव ग्रहणमपि सूचुः। गृहाद्गत्या पापाप्रसादिशृहावधिकमसंबंधिपरत्ववती गंगेति बो
धेमेत्यत्र पंचमी प्रसादस्यायत्रोऽस्थिता कांहानद्र चकारेवत्तस्य दनिमित्ताविभक्ति स्वीकारात्। अवयवयोगेनु ततस्य पापोपादित्
मिनिर्दिष्टगान्ता नेन पूर्वकापंत्स्यत्तिसिद्धिः। प्राक्प्रस्थवाग्रामादित्यादौ ग्रामावधिक प्राक्प्रसत्त्व गंगेति बोधः। ननु चूत्रापरत्वा सध्यर्
देवदत्तइत्यादौ दोषइति चेन्न। आह चेर्ष्याणदिग्वाचकस्यैवग्रहणात्। नचैवं अर्थेतपष्ठातमर्थप्रत्ययेनेति षष्ठी बाधनार्थत्वात्। वस्तुतस्तु प्रसा
याप्रसयपरिभाषयैवसिद्धौ तत्र प्रसपग्रहणं भूयमालाप्रत्ययणवयथा स्यादिति सन्नमर्थः। एवं चात्र प्रा स्यभावेनु तरापरग्रहणमात्तुदक्षिण
ग्रामाद्दक्षिणा ग्रामादित्यादौ ग्रामावधिकदक्षिणदिशिभवेत्यर्थः। अपादानेपंचमीतिसूत्रेयतश्चावधकालनिर्माणमिवान्तिवार्तिक
प्रस्ताव्यानापभाष्यउक्तं। मीढगत्रप्रयोक्तं अंतरान्तप्रयुज्यते कार्तिक्याप्रभृत्यात्र दाग्रहण्यामासेइतिततपप्रभृत्यर्थकयोगे पंचमी विधाय
कानुमितानुशासनेन भवान्प्रभृति आरभ्य वा सेव्योहरिः सिन्त्र पंचमी। अवधित्वरूपः संबंधः पंचम्यर्थः। भवावधिकमरणीनकालिका
सेवाकर्महरिरितिबोधः। आद्यरणाणापारभ्ये सन्त्रनु आरभ्य सस्यगृहीते स्वर्थकत्वेन कर्मत्वाद्वितीया। अपपरिबहिर्योगेषपकाबिभा

इहियोगे पंचम्यनुमानाद्भ्यामाद्दिहिरित्यादौ पंचमी। अवधित्वरूपः संबंधः पंचम्यर्थः। आमावधिकवहिर्देश इति बोधः। अपपरीवर्ज
ने आङ् मर्यादावचन इत्यनुशासनाभ्यां विहितकर्मप्रवचनीयसंज्ञकानामेषां योगे पंचम्यपाङ्परिभिरित्यनेन अपहरेः परिहरेः संसा
र आपाटलिपुत्राद्वृष्टो देव इत्यादौ पंचमी॥ हरिप्रतियोगिकवर्जनप्रयोगः संसार इति बोधः। पाटलिपुत्रावधिकवृष्टिकर्त्ता देव इति
बोधः। अवधित्वरूपः संबंधः पंचम्यर्थः प्रतिप्रतिनिधिप्रतिदानयोरित्यनुशासनविहितकर्मप्रवचनीयसंज्ञकप्रतियोगे प्रतिनिधि
प्रतिदानेच यस्मादित्यनेन प्रद्युम्नः कृष्णात्प्रति तिलेभ्यः प्रतियच्छति माषानित्यादौ पंचमी॥ प्रतियोगित्वरूपः संबंधः पंचम्यर्थः। कृष्णप्र
तियोगिसादृश्यवानिति बोधः। तिलग्रहणपूर्वकं माषप्रतिदानमिति बोधः। केचित्तु कर्मत्वं पंचम्यर्थः। तथा च तिलकर्मकभावनाजन्या
पकारीभूतमाषकर्मिकादानभावना चैत्रो बोधं वदंति। कर्तृवज्जितं पदहणाहेनुभूतं ततः पंचमी सार्वधातुकार्थकारककर्तृयत्ने पंचमी इत्यनुशासना
शताद्बद्ध इत्यादौ पंचमी शतहेतुकबंधनकर्मेति बोधः। गुणहेतावस्त्रियामित्येपंचमी विकल्पविधायकादस्त्रियामित्यनुशासना
ज्जाड्याज्जाड्येन वा बद्ध इत्यादौ पंचमी जाड्यहेतुकबंधनकर्मेति बोधः। धूमादग्निमान्नास्ति घटोऽनुपलब्धेरित्यादौ तु विभाषा गुणेऽस ३५

चमी। बाहुलकं धक्केः ननु हेतोरिति वार्त्तिकप्रयोगोऽप्यत्रमानं। धूमहेतुकमग्निमत्वज्ञानं अनुपलब्धिहेतुकं घटाभावज्ञानमिति बो
धः। पृथग्विनानानाभिस्तृतीयान्यतरस्यामित्यनुशासनात् पृथक् रामेण रामाद्वा इत्यादौ पंचमी। पंचम्यादीनां प्रतियोगित्वरूपः संबंधो
र्थः। पृथक्त्वं वा बोधगुण इति तार्किकाः। नव्यास्तु भेदमेव ज्ञापकमिति वदंति। तन्नु प्राग्वद्दूषितं। तथा च रामप्रतियोगिकभेदवान् इति बोधः
नन्तःप्रतियोगिकपृथक्त्ववानिति वा। विनानानाशब्दयोरपि सत्ताभावोऽर्थः। रामप्रतियोगिकसत्ताभाववानिति बोधः। स्तोकाल्पकृच्छ्रकतिपयानाम
सत्ववाचकानां करणे षष्ठीतृतीयाविधायकात् करणे च स्तोकाल्पकृच्छ्रकतिपयस्येति अनुशासनेन स्तोकेन स्तोकाद्वा मुक्त इत्यादौ तृतीया
पंचम्यौ। स्तोकादिशब्दाः उक्तादिशब्दवद्धर्मधर्मिपरिवर्तेन। एवं चाद्ये गुणक्रियामतिरिक्ता जात्याश्रयत्वरूपसत्वपि न त्वासत्ववाचीनीये स्तो
कारणकमोचनकर्मीभूत इति बोधः। एवं च क्त्वादियोगेऽपि धर्मस्य करणत्वं तु स्वाश्रयद्वारा दूरांतिकार्थैर्योगे पदानामविभाषा षष्ठीविधाय
कादूरांतिकार्थैः षष्ठ्यन्यतरस्यामित्यनुशासनाद्ग्रामोऽत्र षष्ठीपंचम्यौ तथा दूरांतिकार्थशब्देभ्यस्तृतीया पंचमी विधायकाद्दूरांतिका
र्थेभ्यो द्वितीया च इत्यनुशासनाद् दूराद्दूरं दूरेणवा सादौ द्वितीयादयः। आधेयसंबंधः पञ्चम्यर्थः। द्वितीयेन प्रातिपदिकार्थमात्रमिति केचित्। आ

मत्संबंधित्वरूपवृत्तिगमनमिति बोधः। एवं ग्रामाद्भूमस्य वांतिकादेर्नित्कर्मत्रिकेनैव स्यादावपि बोधः। इति दिक्॥ कारकप्रातिपदिकार्थ
व्यतिरिक्तः स्वस्वामिभावादिरूपसंबंधविवक्षायां षष्ठी शेषे। अनेन संबंधरूपे षष्ठीविधानाद्राज्ञः पुरुषः इत्यादौ राजपदोत्तरं षष्ठी। राजनि
रूपत्वसेवकत्वसंबंधवानिति पुरुषो बोधः। संबंधत्वेन संबंधस्य षष्ठ्यर्थः। विशेषत्वेन वा। अनुमानार्थं नापन्नः। ता सर्वथा तत्र विशेषबो
धः। अतएव संयोगादिसत्त्वे स्वत्वरूपसंबंधाभावे चैत्रस्य नेदं धनमित्याद्युपपद्यते। एवं दंडिनमानयेत्युक्ते दंडः स्वामिनानीयते। अपि दंडसंयो
गवानेवा। न च वित्रः। पुरुषस्तत्र संबंधस्य षष्ठ्यर्थत्वे सामानाधिकरण्यं न स्यादिति वाच्यं। संबंधेनाहि संबंधिना सामानाधिकरण्यसंभ
वात्। नाउक्तं च संबंधिनैव संबंधी प्रत्येनुपदिशाक्यते। पुनस्तस्याभिधाक्लिकः। श्रुतेः परिकल्प्यते इति संबंधवादिनस्तु संबंधस्य षष्ठ्यर्थ
त्वे आह। एषादीनां स्ववाक्योपात्तत्वात् अभिनिवेश इत्यत्र सन्निपातिकारणाधिकरकाणां मुक्तेरापत्तेः। तस्मात् संबंधी अर्थः। तथा च वि
भक्त्यर्थसंख्याप्रकारकबोधे विभक्तिजन्योपस्थितिर्हेतुरिति लघुभूतः कार्यकारणभावः संबंधस्य वा अनुपकृतिजन्योपस्थितिर्हेतुरिति
कल्प्यमिति गौरवम्। संबंधिनैव संबंधिनैव संबंधः प्रत्येनुपदिशाक्यते इत्यादिमयापि कथं शक्यं न च संबंध एव तदन्वयः। एकाजको ३९

यत्संबंधरूपाभिधानेनाक्षेपोऽस्यापत्तेः। एवं शेषषष्ठ्याः संबंधी एवार्थः। भूषणोक्तसंबंधाशक्तिरेवं च यत्र संबंधपदं। अर्थः आध्वजतंतोध्यं।
एवं च विशेषणरूपेण षष्ठ्यर्थत्वाभावे स्वत्वस्वामित्वं वा वैयाकरणनव्यैः षष्ठ्यर्थसंबंधस्य सर्वत्र क्रियाकारकपूर्वकत्वमेव साधकं किंचिदुक्तं
कं चिरव्याहृतम्। अतएव हरिणा संबंधः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः। श्रुतायामश्रुतायां वा क्रियायां सोऽभिधीयते इति क्रियाकार
कपूर्वकत्वमेव संबंधस्योक्तं। सापीष्याद्यपि वृक्षस्यैकदेशाधिकरणकस्थितिक्रियाकर्तृत्वनिमित्तकत्वं सा बोध्या। अतएव पर्वतस्य वृ
क्ष इति न वृक्षपर्वतयोराधाराधेयभावमूलकसंबंधाभावात्। संयोगेऽपि नाधाराधेयमूलकः विपरीतस्येन मूलकत्वादित्युक्तं। नतपा
नाभावात्। गौरवाच्चान्ये च हारिकारिकापानां न स्यात्। निमित्तार्थत्वात्। तथाहि षष्ठ्यर्थसंबंधः कर्तृनिष्ठाविधानप्रयोजकत्वपित्रिधा। केव
लसंबंधबोधिका कारकाणामविवक्षापूर्वकसंबंधिका कर्तृकर्मादिसंबंधबोधिका वा तत्र मातुः स्मरतीत्यादौ द्वितीया। आद्ये नस्मपा
चकइत्ती पामामाध्यं संपंचितानागापोष्यस्यादावाद्या। न चात्र विवक्षितं भाष्ये गुणरवत इति न्यायिसद्धेन समीपार्थे स्वस्य
स्याभिधानात्। अतएव द्विरपि अंतःपूतिस्यादावस्तः समीपेन नर्दैनि भाष्ये आस्माच्च षष्ठानपरवत्तिनपाक्यस्वामी स्यादर्थबोधः। स्वीक

सचसमीपादिपदाध्याहारेणएवं च विज्ञागावोयस्येत्याहाचपिसामीप्यबोधः सति तात्पर्ये तत्रापि। तथा योष्टुः एतावता परंपरेदं न च यु
क्तभूत नथाहारेण बोधः इति दुराग्रह। ममन्तु पक्षार्थ इति। तत्र षष्ठ्याः समीप्यार्थकत्वमेव युक्तं। अन्यथा षष्ठीतिपष्ठी श्रवणानंतरं सामी
प्यार्थतात्कैवन स्यात्॥ नहि पदाध्याहरणशंका युपूर्वमेव वा मार्थोपस्थित्यासीत्ति कांक्षत्वात्। एवं द्विरपि सामीप्यार्थेपि सारिनास्ती
नत्वाच्चेति निरूक्ता। एवं च रह। कमिकायां पानुः स्मरती सांरैकपलाद्यविदहपूर्वकेन यः संबंधः सउक्तः अतएव नाम्यपदंसार्थकमन्यथा
संबंधः क्रियापूर्वकस्येव ब्रूयात्। तथा चान्वयदंसंबंधेनान्वितीरावंचकारकेष्यकारककियान्वितप्रातिपदिकेभ्यः ऽन्यत्रायामपष्ठ्या
न्यः संबंधकारकापिकक्षापूर्वकसंबंध उच्यते रस्येवार्थः साधुः। एवं च पर्वतस्य वृक्षा इत्यपि पर्वतसंबंधिवृक्षा इत्यर्थे साध्वेव। स च संबंधः
जन्यजनकभावः ग्रामस्य यथा सारएमकस्यांडेलकत्वार्थकत्वमादाय कूपादीनां ग्रामाग्रामावयवत्वमादाय च यथावयवविभावसं
बंधे ग्रामस्य कूप इत्यादौ षष्ठीति भवद्भिरुक्तं। तथा भ्यामपियाषाणमवृक्षादिसमुदायस्य पर्वतयदवान्यत्वस्वीकारेणावयवाचय
विभावसंबंधोपि वक्तुं शक्यः। वृक्षपर्वतयोरित्यादि षष्ठ्यस्य पर्वतस्य वृक्षा इत्यादिप्रयोगाभावसाधकोपन्यसनं तन्मुधैव आधा

राधेयभावस्य संयोगमूलत्वेपि तस्यैव वृक्षयोः षष्ठ्याः दुर्वारत्वात्। अन्यथा ब्रजमवरुणधिगामित्यादौ वृक्षप्राप्तेन तद्यथवादका कुथि
तं चेति द्वितीयान स्यादिति सार्वोपत्यवृणवस्यात्। अस्तकवाभवदुक्तरावृहरिकारिकार्थः। तथापि सामीप्यादौ तुल्युक्तिपरिकल्पि
तक्रियाकारकसंबंधस्यस्वीकारात्। तद्धित्यात्रापि सामीप्यसंबंधेपर्वतस्य वृक्षा इतिवक्तुं शक्यत्वात्। पदार्थैकदेशसंयोगेन सं
बंधः। संबद्धस्य पदार्थबोधकस्य पदार्थये जनमात्रहेतुत्वात् संयोगस्य स्वतः पदार्थत्वात्। सांसर्गिकविषयतया तस्याभा
नात्। संबंधेऽपि षष्ठ्यादिभिरेवोच्यते। संबंधपदेनापि सांसर्गिकविषयतावत्वेन नोच्यत इति संबंधसर्वथापदगम्यः सं
योगस्तु न कदापि षष्ठ्यादिभिः तथा विषयतयोच्यते। इमौ संयुक्तावित्येव तत्र व्यवहारएतु। तत्र संबंधव्यवहारस्तु अन्यथाश्री
नत्वरूप-प्रत्ययबोधः। अपि कि मम ... प्रधस्तनद्वितीयफक्को गम्य इति संयोगम्य इति संयोगभेदकफक्किकायामुक्तं तदपि न।
तत्रैव कारव्यावृत्त्याभावात्। संबंधस्य संबंधस्य सांसर्गिकविषयतयाभानाभ्युपगमे तस्य षष्ठ्यर्थत्वमेव न स्यात्। तथा
षष्ठ्यर्थस्य सांसर्गिकविषयतयैव भाषत इति नवग्मिपि रुक्तत्वात्। यदपि षष्ठ्यर्थः स्वत्वस्वामित्वादिसम्बंधरूपस्तु क्तं तद

पिना गौरवाच्च स्वस्वामिगुरुपादाद्यन्वयेन प्रत्ययानां प्रकृत्यर्थान्वितत्वे स्वार्थादिनियमभंगापत्तेश्चेति दिक् । तस्मात् संबंधित्वेन संबंधो वेत्यर्थ
त्स्वत्वसंबंधादिति प्रयोगः साधुरेव । तत्र च संबंधित्वेन संबंधः प्रकारत्वेन भासते प्रयोगोपात्तत्वाद्यत्र तु षष्ठी नास्ति नीलोऽसौ घटो तत्र संसर्गतये
ति विवेकः । न च संबंधस्य प्रकारत्वेन भानाभ्युपगमे षष्ठी शेषे इति सूत्रस्य भाष्यविरोधः । तत्र हि राज्ञः पुरुष इत्यत्र राजा विशेषणं पुरुष
विशेष्य इत्युक्तं षष्ठ्यर्थसंबंधस्य प्रकारत्वेन भाने तु संबंधे विशेषणतया विशेष्यतया वा ब्रूयादिति वाच्यं राजनि प्रकारतानिरूपि
तपुरुषनिष्ठविशेष्यतारूपसंबंधस्य प्रकारत्वेन भानाभ्युपगमे संबंधे तयोर्विशेषणविशेष्यभावासंभवाभावात् स्वत्वस्वामित्वादिवि
शेषरूपेण भानं तु सांसर्गिकविषयतयैवा । अत एव भाष्यकारेण राजा विशेषणं पुरुषो विशेष्य इति स्पष्टीकृतमिति ग्रंथयोरविरोधाद्
पत्यन्ते । षष्ठ्यन्तमनुवर्तमानः हेतुशब्दप्रयोगे हेतुत्वेन द्योत्ये षष्ठीविधायकषष्ठी हेतुप्रयोगे इत्यनुशासनेन । अन्नस्य हेतोर्वसतीत्य
त्र षष्ठी । एकाश्रयकोऽन्नहेतुको वास इति बोधः । अत्र निष्ठजनकतानिरूपितजन्यताश्रयो वास इति वा बोधः । अत्र हेतुपदस्यात्र हे
तुशब्दप्रयोगेपि तयोः सत्त्वाभावात् षष्ठी हेतुसर्वनाम्नः पूर्वोक्तविषये तृतीया षष्ठीविधायका सर्वनाम्नः तृतीया चेत्यनुशासनात्किं

हेतुना कस्य हेतोर्वा वसतीत्यादौ तृतीयाषष्ठ्यौ । एकाश्रयिका प्रश्नविषयहेतुका वासक्रियेति बोधः । निमित्तकारणहेतुषु सर्वासां
प्रायो दर्शनमित्यनुशासनात् किं निमित्तं केन निमित्तेन कस्मै निमित्ताय इत्यादौ प्रथमादयः सर्वविभक्तयः । प्रायोग्रहणात् सर्वना
म्नः प्रथमाद्वितीये न । पूर्वस्मात् दूरमस्मादन्तिकार्थाद्धिग्दिक्शब्दरूपार्थकप्रत्यययोगे अन्यारादिति पंचम्यपवादषष्ठीविधायक
षष्ठ्यतसर्थप्रत्ययेन इत्यनुशासनेन ग्रामस्य दक्षिणतः पुरः पुरस्तादित्यादौ षष्ठी प्रतियोगित्वरूपः संबंधः षष्ठ्यर्थः । एवं विभ दक्षिण
न ग्रामादिप्रयोगाः । पंचम्यादिकारणवाचकेन चैनपा योगे षष्ठ्यपवादद्वितीयाविधायकेनपा द्वितीयेत्यनुशासनेनेति विभागे मानाभिकरणतृती
यां तत्तत्वेन वर्तन्ते तथा च नास्य प्रवृत्तिः । दूरान्तिकार्थयोगे षष्ठीपंचमीविधायक दूरान्तिकार्थैः षष्ठ्यन्यतरस्यामित्यनुशासनाद्ग्रामस्य
ग्रामस्य दूरमन्तिकं वेत्यत्र षष्ठीपंचम्योः प्रतियोगित्वसंबंधो विभक्त्यर्थः । व्यवहृपणोरिति सूत्रे पणसमर्थितः कुन्दवेन द्यूतार्थस्य
क्रयविक्रयरूपव्यवहारार्थस्य दिवः कर्मणि कर्मत्वेन विवक्षिते षष्ठीविधानात् दिवस्तदर्थस्य इत्यनुशासनात् शतस्य दीव्य
तीत्यादौ षष्ठी । शतकर्मिका क्रीडा अर्थः संबंधधर्मवत्त्वाङ्गीकारेण तत्र एवमनुपपत्तिर्नु कृत्वा सर्वत्र स्वार्थसमभ्युपगमानेऽदवरत्न

इत्यां षष्ठ्यर्थस्य पत्युपादानमिति भाष्येऽउक्तं। षष्ठ्यर्थश्च सांसर्गिकविषयतयैव भासते। अत एव षष्ठी शेष इति भाष्ये राज्ञः पुरुष इत्यत्र
राजा विशेषणं पुरुषो विशेष्य इत्युक्तं। अन्यथा संबंधो विशेष्यतया विशेषणतया वा ब्रूयात्। राज्ञः पुरुष इत्यत्र स्वस्वामिभावः षष्ठ्यर्थः।
स च स्वत्वस्वामित्वसमूहरूपः। अत एव स्वस्वामिवयर्थयेव विभागः आधाराधेयभावसंनियोग्यनुयोग्यनुयोगिभावो विशेषण
विशेष्यभावः संबंध इत्यादि व्यवहार इत्युक्तं तदपि न संयोगस्य संबंधत्वे षष्ठ्यर्थत्वे च बाधकाभावात्। न चा कं दुदयोनाक्तवा
र्थ धकमिति वाच्यं तस्य संबंधत्वात् तथा हि किं संयोगस्य संबंधत्वे षष्ठ्यर्थत्वे च बाधकाभावात्। नास्तीति चेत् तत्र षष्ठ्यर्थत्वं नास्ती
ति यद्वा संबंधपदाभिधेयत्वं नास्तीति। न चाद्य संयोगस्य स्वतः पदार्थत्वेपि सांसर्गिकविषयताभावेपि संबंधत्वे बाधकाभावात्।
न हि संबंधस्य पदार्थत्वे सांसर्गिकविषयतयैव वा भानं नियतं येन भवदुक्तं संगच्छेत। अन्यथा राज्ञः स्वामित्वादेर्वदनतः स्वामी स्वत्वादाप
स्वस्वामिभावस्य पदार्थतया सांसर्गिकविषयेभानेन च स्वस्वामिभावादीनामपि उक्तरीत्या संबंधत्वं न स्यात्। उभयोरपि स्वत्वात्।
न च संबंधः षष्ठ्यर्थादिनिरूपितो अतः संबंधपदेनापि सांसर्गिकविषयतावत्त्वेन नो एतदनिसंबंधः सर्वथा पदाग्रतः संयोगस्तु न कदा

चिपक्षादिभिस्तथाविषयत्वयोऽतो इमौ संयुक्ताविति एव तत्र व्यवहारादित्यादिनोक्तमेवपरकमिति वाच्यं गंगायां स्थितिमित्सा
दौ संयुक्तपदाभावेपि पक्षागंगातीरयोः संयोगसंबंधस्य प्रतीयमानत्वेन भवदुक्तभेदाभावात्। स्थ स्वाम्याः अन्यस्वामिकपी
तां वदंडादि संयुक्तेपि पुरुषपीनादीयोर्थं दंडी इत्यादि व्यवहारात् संयोगाभावेनु स्वस्वामिभावे सत्यपि न तादृशप्रयोगः। पवदिपि
तत्र संबंधव्यवहारस्तु स्वयाश्रितत्वरूपसंबंधवत्त्वाद्धि गौण इत्यादिना संयोगस्य संबंधत्वांगीकारात् तत्र स्वगौणत्वे प्रमाणाभा
वात्। न च पत्नुपुत्रेवरूक्तवा सर्वत्र इत्यादौ षष्ठ्यर्थस्य पत्युपादानमिति भाष्यं मानं नन्वार्ये पदाधिकरणक इत्युक्त इत्यर्थविवक्षायां तत्
स्य सार्थक्यात् गौमान्स्वदन्तर् इत्यादौ षष्ठ्यर्थस्य पत्युपादानमिति तत्र नु आदिपदास्तु संत्वग्रहणमात्रं न चात्र संयोगस्य संबंधत्वप
र्वतत्स्य वृत्त्यमर इति प्रयोगस्येष्टत्वे तत्रैव षष्ठ्यन्तपदसार्थक्ये गौमान्स्वदन्त इति दूरमनुधावनं मर्थमिति वाच्यं। अत्रान्यतरा
पादानेनापि प्रयोगसिद्धिः गोमान्स्वदन्त इत्यत्र स्वाधिकरणत्वविवक्षायाः असंभवात् मुख्यपक्षसंगत्यो दाहरणमिति मन्तिमाये
णत्वस्य सार्थक्यात्। न च पर्वतस्य वृक्षाः प्रतिनं तत्रनत्वमर्बंतो निस्पष्टमेव प्रयोगाभावः अनिपादितरत्युक्तिवाच्यं सम्यग्यदाधिकरणत्व

नविवक्षातस्तत्र षष्ठी प्रतिपाद्यतामभवंती त्येवमभिप्रायकत्वात्। एवं च संयोगस्य संबंधत्वे पक्षे यत्तेवासंबंधपदाभिधेयत्वे
वाभावविरोधः षष्ठ्यभावापत्तिरूपदोषाभावाच्च स्वभावे वा फलाभावाच्चानुग्रहेण संबंधाभावप्रतिपादनपरत्वमिति दिक्। यदपि संब
न्धषष्ठ्यादिनिरासो ऽतः संबंधपदेनापि सांसर्गिकविषयतावत्त्वेनेत्यत इति सर्वथापरा पूर्वतनपुंसां नितरां पृष्ठ पंच पं
कक्तौ शोधो शेषः ग्रहणे वादे वदन्त कर्तृके इति बोधः। सोपसर्गेषु विभाषोपसर्गे स्नेनेन विकल्पो ऽस्तु तस्यापि तत्रापि निर्देशः। म
न्तीत्यादौ षष्ठी बोधः। पूर्वोक्तवत्तादृशवत्तासंप्रदानके ऽर्थे वर्तमानयोः प्रेष्यब्रुवोः कर्मणो हविषो देवताचकारात् षष्ठी विधायकस्य प्रेष्य
ब्रुवोर्हविषो देवतासंप्रदानसंज्ञा इत्यनुशासनाद् ग्नये छागस्य हविषो ऽनुब्रूहि प्रेष्य वेत्यत्र कर्मत्वे षष्ठी। छागादयश्चात्र
वपासंबंधि हविः स्मृतमेतत्कर्मकः प्रेष्य इति बोधः। प्रस्थितत्वेन विशेषणात्विनु प्रस्थितत्र...तेरिति वार्त्तिके नषष्ठी प्रतिषेधे द्विती ष्ठ
तीया एवं द्रष्टव्ये ऽग्नये छागस्य हविषो मेदः प्रस्थितं प्रेष्येति प्रयोगः। कृद्योगे कर्तृकर्मणोः षष्ठी विधायकात्कर्तृकर्मणोः कृतीत्यनुशासना
त्कृत्प्रत्ययस्य कृतिः जगतः कर्त्ता कृष्ण इत्यत्र षष्ठी कृत्स कर्तृककृतिः। जगत्कर्मकं कृत्साश्रयाभिन्नः कृष्ण इति बोधः। लोकं पाक इति

५७

अत्र न कर्तृग्रहणं चर्येण धात्वर्थकर्मण्येव तत्प्रवृत्तेः। कृत्येकग्रहणात् सन्निकोभूमिरिदं वदन्तः। शकेन कीर्तः। सो ऽयं इत्यादौ तद्धि
तस्य एव कर्तृत्वस्य णिततत्त्वता कृत्तत्पूर्वाकरणमित्यत्रापि भावे क्तांतेन पूर्वशब्देन समासे इनोपध्वा कंठे न संबंधे कृत्समासे न प्रयोगाभा
वलोके इति निषेधात् षष्ठ्यभावेद्वितीया एव भोदनं पाचकतमः इत्यत्रापि ऽप्र्यन्तु ऽओदनस्य पाचक तमः षष्ठी भ्रमस्य च कर्तृत्व
न तद्धितार्थप्रतिगुणीभूतक्रियायाः ये कर्तृकर्मणी तत्रैव स्यावर्त्तनात् इत्याहुः। न च धर्मेयाभोदमिति यद्यपि प्रयोगानुपपत्तेः। अ
नि स्पष्टमिदं तद्धितमिति द्वितीयातन्त्रकृच्छ्रप्रयोगात् ननु समस्तमेवास्तु इति चेन्न तत्रतस्यैवे स्वत्वयोगविभागेन तत्रैव तत्समासः अर्थेमि
सेवं कृपेण विसिद्धि न तुच्छोपदानेन समासाभाववोधनात्तानुमिदे एवं तासत्पुष्यिषिदिकादेवदन्तस्यका शानामिसादीपाचय
सोदनं देवदत्तेन यज्ञदत्तस्यासादिविषयुत्वेन प्रयोजककर्तृवाचकादेव षष्ठी स्यादिति चेन्नावैस्माद्यानाप्याद्वितत्रैकेन तत्का
ण्यकर्तृद्वयवाधासंभवादुक्तन्यायः प्रवर्त्ततेऽपक्षेतत्तु ऽओदनः पाचितो देवदत्तेन यज्ञदत्तेनेत्यादिवदुपपत्तिः। तेनाश्वस्य सुगमस्य
सुग्वे स्यत्र गुणकर्मणि षष्ठी विकल्पः इष्यते सुश्व संबंधि अश्वकर्मकनयनकर्त्तेति बोधः। उभयोः प्राप्तिर्यस्मिन्कृति तत्र कर्मण्येव

षष्ठीनियमकादुभयप्राप्तौकर्मणीत्यनुशासनादाश्चर्योगवांदोहोगोपेनेत्यत्रकर्मण्येवषष्ठी॥ अगोपकर्तृकगोकर्मकोदोहः आ
श्चर्यइतिबोधः। स्त्रीप्रत्यययोरकाकारयोर्नियमाभावाद्भेदिकाबिभित्सावारुद्रस्यजगतइत्यादावुभयत्रापिषष्ठी॥ भेदकर्तृकाजग
त्कर्मिकाभेदनक्रियेतिबिभेत्सुर्पिच्छाचेतिबोधः। गुणकर्मयुम्मवाप्यानेइत्यत्रानुकरणेतृतीया। अकाकारयोर्धनितिकृत्वाप्रत्ययक
र्तरिषष्ठीविकल्पविधायकेयंशेषविभाषेत्यनुशासनेनविचित्राजगतःकृतिर्हरेर्हरिणावेत्यत्रकर्त्तरिषष्ठीविकल्पः। हरिकर्तृ
कजगत्कर्मिकाक्रियाविचित्रेतिबोधः। शब्दानामनुशासनमाचार्येणाचार्यस्यचेतिप्रयोगानुरोधाच्छासनाभ्यामवरोधशब्दार्थः।
आचार्यकर्तृकंशब्दकर्मकंविविधमार्सधुत्यःअविभमवोधनमाधनमितिबोधः। वर्त्तमानार्थक्तप्रत्यययोगेषष्ठीविधायकात्
क्तस्यचवर्त्तमानइत्यनुशासनाद्राज्ञांमतोबुद्धःपूजितोवेत्यत्रकर्त्तरिषष्ठी। राजकर्तृकवर्त्तमानेच्छाज्ञानपूजाश्रयइतिबोधः। म
तिबुद्धिपूजार्थेभ्यश्चेतिवर्त्तमानेक्तः। एवंराज्ञांमतंनपुंसकेभावेक्तइत्याज्ञापिपूजितोयःसुरासुरैरित्यादौभूतेक्तः। ननुवर्त्त
मानेतेनतृतीयातत्रोपपद्यतेछात्रस्यहसितमित्यत्रशेषत्वविवक्षयाषष्ठीकर्तृत्वविवक्षायांतुतृतीयैवक्तोधिकरणेचध्रौ

व्यगतिप्रत्यवसानार्थेभ्यइत्यनेनविहितस्यक्तस्ययोगेषष्ठीविधायकादधिकरणवाचिनश्चेत्यनुशासनादिदमेषामासितंग
तंभुक्तंचेत्यत्रषष्ठी। एतत्कर्तृकासनगमनभोजनमितिबोधः। अत्रोभयप्राप्तौकर्मणीतिनियमाभावादिदमेषांभुक्तमोदन
स्येत्युभयत्रापिषष्ठी॥ ओदनकर्मकमेतत्कर्तृकभोजनमितिबोधः। लादेशःउउकःअव्ययनिष्ठाखलर्थतृनामितियोगेकर्तृक
र्मणोरित्यस्याप्राप्तषष्ठीनिषेधविधायकेननलोकाव्ययनिष्ठाखलर्थतृनामित्यनुशासनेनषष्ठीनिषेधात्कुर्वाणःसृष्टिंहरि
रित्यादौद्वितीया। सृष्टिकर्मकक्रियाश्रयोभिन्नोहरिरितिबोधः। हरिंदिदृक्षुरलंकरिष्णुरित्यादौहरिकर्मकदर्शनेच्छावानलंक
र्मकालंकरणकर्त्ताचेतिबोधः। दैत्यान्घातुकोहरिरित्यादौदैत्यकर्मकहननकर्त्ताभिन्नोहरिरितिबोधः। कमेरनिषेधइत्यनेन
निषेधाभावबोधनाल्लक्ष्म्याःकामुकइत्यत्रषष्ठी। लक्ष्मीविषयकेच्छावान्। जगत्सृष्टासुखंकर्तुइत्यत्रजगत्सर्जयोक्तृकासिको
सुखक्रियेतिबोधः। दैत्यान्हन्तुंव्रजतीत्यत्रदैत्यकर्मकभूतहननाश्रयइतिबोधः। विष्णुनाहतोदैत्यइत्यत्रविष्णुकर्तृकहननक
र्माभिन्नोदैत्यइतिबोधः। ईषत्करःप्रपंचोहरिणेत्यत्रहरिकर्तृकप्रपंचकर्मकमीषत्करणमितिबोधः। सोमंपवमानःआत्मा

नंद्यमानः कर्त्ता लोकान्वेदमधीयनुद्‌स्यादौ तृन्निति षस्या हारग्रहणान्निषेधः। अधर्ब्बोः आग्वना। शतृप्रसयांतद्विषधातुयो
गे विकल्पेन षष्ठी विधायकद्विषः शतुर्वेत्यनुशासनान्मुरस्य मुरं वा द्विषन्नित्यादौ षष्ठी। मुरकर्मकद्वेषकर्तृनिबोधः भविष्यता
कस्य भविष्यदाधमर्ण्यार्थकेन च योगे षष्ठीनिषेधविधायके नाकेनोर्भविष्यदाधमर्ण्ययोरित्यनुशासनेन नगरं पालकोव्रजतीति
व्रजंगामी शतं दायीत्यादौ न षष्ठी। शतकर्मकभविष्यत्कालीनकर्मनिबोधः। निषेधस्तु कर्तृत्वकर्मत्वप्रकारकबोधः षष्ठ्या अस्तावुल
बोधकः। धर्मसंबन्धेन धीधेनुसाधुरेवाद्यर्थानां योगे कर्तरि षष्ठी विकल्पविधायकाद्यर्थानां कर्तरीत्यनुशासनाभ्यामपि
से व्योहरिरित्यादौ षष्ठी विकल्पः। भक्तकर्तृकसेवनकर्मा मित्रोहरिरिति बोधः। तुल्योपमाशब्दभिन्नैः पदैस्तरनिरपेक्षैः तुल्यार्थकैर्योगसं
बंधसामान्ये षष्ठ्यां प्राप्तायां पाक्षिकतृतीयाविधायकात्तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्यामित्यनुशासनात्तुल्यः कृष्णः कृष्णो
वा कृष्णस्य कृष्णेनेत्यत्र पाक्षिकतृतीया। कृष्णप्रतियोगिकसादृश्यवानिति बोधः। गौरिव गवय इत्यत्र परत्वान्नाप्रायेण त्वेन बाधेना
तुल्यार्थतासष्टीनां। आयुष्यभद्रकुशलसुखार्थहितैस्तदर्थकैर्योगे आशिषि शेषे पाक्षिकचतुर्थीविधायका चतुर्थी चाशिष्यायु

ष्यमद्रकुशलसुखार्थहितैरित्यनुशासनादायुष्यं चिरंजीवितं भद्रं भद्रं कुशलं निरामयं सुखं समर्थः। प्रयोजनं हितं पथ्यं कृष्ण
स्य कृष्णाय वा भूयादित्यादौ चतुर्थी षष्ठी वा। अनाशिषि हितयोगे शेषे षष्ठी वाभिन्ना चतुर्थी विधायकहितयोगे चेत्यनेन
चतुर्थ्येव भवतीत्येवं हरायहितमिति। कर्तृकर्मद्वारा तन्निष्ठक्रियाधाराः औपश्लेषिकवैषयिकाभिव्यापकत्वाधार
कारकस्याधारोऽधिकरणमित्यनुशासनेन संज्ञायां सप्तम्यधिकरणे चेत्यनेन कटे आस्ते स्थाल्यां पचतीत्यादौ किंरवयवावच्छेदेनाधा
रस्याधेयेन आभिमुख्योपश्लेषाधिकरणत्वसप्तमी कटाधिकरणिके कर्तृकासनक्रियेति बोधः। स्थाल्याधिकरणके कर्तृकापाकक्रिया
चैत्रतंदुलादिपदसमभिव्याहारे तु सकचित्राभिन्नकर्तृकौदनकर्मके ति विशेषः। विषयतासंबंधेनावच्छिन्नाधिकरणस्तु मोक्षेर
छासीतिमोक्षविषयेच्छा कर्तृकासनेति बोधः। अत्र धात्वर्थप्रतिमोक्षस्य कस्य कर्मत्वेपि प्रसयोपात्तप्रसिद्धेच्छा कर्तृद्वारा तत्क्रिया
यामन्वयस्य विवक्षितत्वेन सप्तमी धात्वर्थप्रसन्नवयविवक्षायां तु कर्मता कर्तृकर्मणोः कृतीति षष्ठ्येव मोक्षेच्छास्तीति न मोक्षेर
छतीति न प्रयोगः। उपमानेप्ति क्रियानिरूपितकर्तृद्वाराधिकरणत्वबद्धपमेयनस्माभेन छतीति निरूपितकर्मत्वादितीयेवपरत्नु

अधिकरणस्य कर्त्राद्यन्वयरूपकत्वाधिकरणे चैत्रकर्तृकसमानमित्यादि रीत्या बोधः । अनएवाह भोः इत्यादौ सामान्योक्त
भावः । अरुचिबीजं प्राचीनैरेकानि सेवबोधानुभवात् । यत्तुएवं चात्रां नमूर्तक्रियाद्या सामर्थ्यमिति कियदाद्यस्ति स्यादस्मा
दुवैयाकरणनमात् । ननुयं विंता अंतभूताक्रियाशौंडपदार्थप्रावाण्यरूपा क्रियास्वेदृद्बकुक इत्यर्थः । कियद्दनोक्तइति
नवेलरुएवं अवच्छेदकालच्छेदेनोवृत्तिमत्प्राभिमापकाधिकरणेनुसवस्मिन्नासामान्तीत्यादौ ननु विकुशन आतपेनिरूनी
त्यादावुधक्रत्रयकाधिकरणाभावात्कथंसप्तमी चेत् । अत्र केचित् आतपपदस्मृतनसंबंधिनिलक्षणयातसंयुक्तगृहद
त्यर्थः । आतपशब्दे नगमनप्रतिबंधकप्रभूदेशानवच्छिन्निराधारगमनानुकूलाकृतिः पदिति निष्ठा सा तु । वैयाकरणनमास्तु
अप्रतिबंधक प्रतिरूपयोगसंयोगतमत्र्यायेतन्दितसंबंधेनपदाधिकरणं नदेव यिकं तत्रयं सप्तमी स्यात्कुवस्तुतस्तुममान्
भावस्मात् इत्यादाविचारेतौपश्लेषाधिकरणेसप्तमी इक्येणचीत्यादौ वेपक्षिकाधिकरणे सप्तमीति संहिमाया
मितिसूत्रस्थभाष्यमेवसंगच्छते अन्यथाख्ययोरेवसंयोगइतिनियमात्गुणयोर्मुख्यौपश्लेषाभावात् भाष्यमसंगतं ४४

स्यात् इत्युक्तमिति सूत्रस्थं भाष्यमेव संगच्छते । अन्यथा द्रव्ययोरेव संयोग इति नियमेन योमुख्योपश्लेषाभावात् भाष्यमसं
गतं स्यात् इत्युक्तनिकांतकर्मणि सप्तमीविधायकात्कस्येन्द्रिविषयस्य कर्मण्युपसंख्यानमिति अनुशासनादधीतेव्याकरणे
इत्यादौ सप्तमी व्याकरणकर्मकाध्ययनकर्तेति बोधः । अत्रक्तपूर्वविद्भ्यो वक्तः । अधीतमनेनेतीष्टादिभ्यश्चेति निःप्रासप
धीती व्याकरणे इत्यादौ लक्षानुशासकाल्लादिकर्मणि नेष्टं प्रवर्तेत । कथंचित् प्राप्तिमाहुः पक्षसप्तकारसप्तमीविधायक
साधनपुण्यागोवस्रनुशासनेन साधुःकृष्णो मातरि अस्माधुर्मातुलइत्यादौ सप्तम्यापात् संबंधिशालिनः पुण्यकर्मवान्तिति वा
साधुत्वस्य मृत्येन संबंधात् नपदात्परषष्ठी मृत्स्यपदात्सप्तमी नक्तंतङ्गेन प्रथमया चाधारसप्तपि आह तत्पदार्थनिष्ठरूपेणका
नुकूलकाविषयरूपनिमित्तस्य कर्मणा संयोगसमवायान्यतरसंबंधेनादइतिनिमित्तवाचकासप्तमीविधायकान्निमित्तात्कर्मसं
योगइत्यनुशासनाच्चर्मणि द्वीपिनं हंति दंतयोर्हंति कुंजरं केशेषु चमरीं हंति सीम्नि पुष्कलको हत इत्यादौ सप्तमी द्वीपिनि
ष्ठप्राणवियोगानुकूलचेष्टाविषयचर्महेतुकातदर्थीवाक्रियेनिवाधःहिन्तुहतीयाना दर्थ्यं वाधके यमाभुमांकाफला

यकारिणं युविरहं तिङ्सादौ क्रियार्थोपपदे इति चतुर्थीयोगाभावेनुवर्तनेन धीन्यस्तु नातिवर्तनायवेतिप्रयोगः विमनहेतुकं
नरर्थं वा सधान्यकर्मकं लवनामिति बोधः कर्तृकर्मणोः स्वनिष्ठक्रियाद्वारकेतरकर्तृकर्मनिष्ठक्रियालक्षकत्वेविवक्षि
तेलक्षककर्तृकर्मवाचका सप्तमी विधायवाय स्वचभावेन भावलक्षणमित्यनुशासनात् क्रोषुदुह्यमानासु गतर्इसादौ
कर्मणि ग्रासमेण ष्वधियानेषु रसादौ कर्तरि सप्तमी वन्नभानदोहनकर्मीभूतगाविष्वतायकानिरूपितताप्यताचरमेना
अयइति बोवर्त्तमानाध्ययनकर्मीभूतग्रासमेणनिष्ठरूपकते सादि पूर्ववत् दुग्धास्वित्यत्र वर्त्तमानध्वंसप्रतियोगिदोहो
नकर्मीभूतेत्यादि प्राग्वत् धो स्समाणास्वित्यत्र विद्यमानप्रागभावप्रतियोगिदोहनकर्मीभूतेत्यादि प्राग्वत्तापत्र वर्त्तमान
ध्वंसप्रतियोगिदोहनकर्मीभूतेवोनविवक्षितस्तत्रगावोदुह्यन्तेचवोगतर्इसेवयूयोः गच्छिन्वादौ नोदिमुसंकुयादिस्वत्रविवा
यर्वेनतखाका लोलस्सतेविकरणेरसप्तमी तद्रूपाणेगेष्वयादिस्यादो तद्रूपणगादिपदे नानदाश्रयः कालः अनेगवांदो
हेत्वागतेर्इसादौ निमित्तसप्तमी निरिक्षावहारापि अधिकरणसप्तमीमादायैव तनुनिमित्ते सप्तमीविधानमस्तीतिशपाने ४५

नै

नचैत्रेणभुक्तमित्यत्रनणकर्तृत्वात् यत्तु भुसन्निवादेशयनभोजनक्रिययोः समानकालीनत्वेनापि तल्लर्इप्रत्ययेनैवसम
पि आह्वाणत्तभोजनादिसमानकालीनत्वंशयनक्रियायाबोध्यतेत्रैतिसप्तमी अप्रत्ययेनतनर्इविधानएवसप्तमीविधानादिसु
क्तं नत्रागोषुदुह्यमानास्वित्यादि मुख्योदाहरणादस्यभवडी स्याभेदाभावाक्रियाह्वाणांक्रियाकर्तृत्वे विवक्षितेप्याक्रियानह्वाणां
तरभावविवक्षितेथानह्वाणांतरभावेक्रियाह्वाणांतस्मिन्विवक्षितेसतिसप्तमीविधायकादर्ह्वाणांकर्तृत्वेनह्वाणां वा कर्तृत्वे
नैहूपरीत्येचेत्यनुशासनेन सप्तमुतर्स्तु अस्तन आसते अस्तुनिष्ठ सुसंततस्तरं निरहरूप्रथमवाक्यपदूये औचित्यस्यसुतिष्ठसु
अत्रसत्स्तरेति अस सुतरसुसंतस्तिष्ठं निरहरूवाक्यपदू येनौचित्यंमंयंऔचित्यानोचित्यसहत्वसंबंध्य संबंध्यसमंजकपासंबंधे सप्तमी
अनएवनयसत्वधावे स्येनर्थाना अन्येनुअर्थमिदमित्याहुः केचदारयस्तुलक्षणलक्षणभावोपिदायामिदमित्याहुः अनादरामपि
केभावलक्षणेपष्टी सप्तमीश्वाधिपतिदायादसाक्षिप्रतिभूप्रसूतेश्चेत्यनुशासनात् गोषुस्वमित्यादौषष्टीसप्तम्यौनिरूपकता
रूपः संबंधोविभक्त्यर्थः तथाचगोनिष्ठस्वत्वनिरूपितस्वामित्ववानिति बोधः गवांनिप्रसूतः गाएवानुभवितुं नातरर्इ सर्वः गविगोपु

दार्थद्रव्यत्वगोचरसंबंधिदायकर्मकादानकर्तृनिरोधः। दीयते मोदायस्तमास्त्रे मोदायादः। विप्रत्ययर्थस्य समुदायसंबंधेष्वयेन
दायेनापि संबंधः। तथा च गवार्थस्य कस्मात्ः स्यादिति सर्थः। गवां मध्येषु वस्त्रामर्तिनप्रयोगः। उप यत्र समानविभक्तिकत्वनियमात्। कृते
निमूते भाष्ये तथैव सम्भूतत्वात्। तदेक भाषाद्रूपा सेवायाभा युक्तः। उपलोवाहरि गुणेगच्छे। सप्तमी विधायकाद्यायुक्ते कृपतामां
चैसोवायाम्पि स्वनुशासनेनादायुक्तः। उपलोवाहरिपूजनेन हरिपूजनस्यवाह स्याद्दोषष्ठी सप्तम्योर्हरिपूजनविषयकतासर्यवानिति
बोधकोशलत्वस्याद्दोषष्ठीसप्तम्योर्हरिपूजनविषयकतासर्थवानितिबोधकौशलत्वानिति वा। विषयसप्तम्यां मामायां वचनात्परा
पत्र स्वजातिगुणक्रियासंज्ञाभिः पृथक्करणरूपनिर्द्धारणप्रतियोगितावच्छेदकमनुष्यत्वगोत्वादिनिर्द्धारणमपि स्वनुशासनविषयीभू
तो न्राभ्रणादौ सत्वनिर्द्धारणप्रतियोगितावच्छेदकमनुष्यत्वादिनिशिष्टा। षष्ठी सप्तमी विधायकाद्यतश्चनिर्द्धारणमिस्वनुशासना
नृणां नृषु वा द्विजः श्रेष्ठः। गवां गोषु वा कृष्णा बहुक्षीरा। गच्छतां गच्छत्सु वा धावन्तः शीघ्राः। अभीषां छात्राणां देवदत्तः पटुः स्यादोषष्ठी ४६
सप्तमी वा। अत्र निर्द्धारणं विभक्त्यर्थः। तथा च श्रेष्ठादिभिः स्वप्रतियोगिकनिर्द्धारणविषयो न्राभ्रणादि इति बोधः। एवमन्यत्राप्यूह्यम्।

४५

ननु नानामाहृत्रियः शूर इति स्यादिति चेन्न। अत्रैकवचनाविषययोरेव षष्ठीसप्तम्योरुक्तनिर्द्धारणबोधकत्वमनुशासितत्वीकारात्। अन्य
तु अनुशासितपदं नात्र तथानुशासित्वीकारेऽपि जातिपदं नात्र प्रयोगरूपसंभावात्। अतएव दृष्टः सामासिकस्य चैत्रनिर्गतो गच्छतीत्यादौ
षष्ठीसमासस्तु निरूढप्रयोगोपि संगच्छते। यद्वक्तृकौशल्यात्तथा साधुतापत्तेः। ननु नराणां मध्ये क्षत्रियः शूर इत्यत्र मध्यशब्देनैव निर्द्धार
णं स्योक्तत्वात्सप्तम्याद्यिति चेन्न। यतो नियतं निर्द्धारणषष्ठ्याः अपि तु मध्यशब्दयोगसंबंधसामान्ये षष्ठीसप्तम्यौ वक्ष्यते। इति किं चितात्र
येन निर्द्धारणवाचिना मध्यदेवस्सम्बन्धस्तदर्थकषष्ठ्याः संबंधरूपेणैवान्वयात्। विवक्षान्तरवैयर्थ्यात्। एवं च नरेषु मध्ये सविशेषणावा
ननु इत्थं पृथग्योगं भवतीति स्यादिति चेन्न। प्रकृतसूत्रे पाठदेकदेकपृथिव्येकदेशत्वात्। तरहस्यान्तरं करणग्रहणात्। यद्वा विशेषस्य
विवक्षितत्वात् प्रवृत्तः। धर्मवत्त्वरूपनिर्द्धारणं। तथा च क्षत्रियाः सावच्छिन्नवृत्तिकपदप्रतियोगिकवच्छूरत्वमभिन्नः क्षत्रियः इति बोधः।
निर्द्धारणप्रतियोगितावच्छेदकमनुष्यत्वगोत्वादिनिर्द्धारणविषयीभूतेनराकामादावस्तरूपसंबंधेन पंचमीविधायकपंचमीविभक्तिः
स्वनुशासनेनानमाथुरः। पाटलिपुत्रकेभ्यः आपतरारस्तत्र पंचमी। पुत्रलिपुत्रका संतमोदवंतः भिन्ना माथुराः आयतरा इति बोधः। अ

ऽनुपादत्तिपुत्रकधनाधिकधनवंतिमाथुराः। एवं वैश्यशौर्याधिकशौर्यावंतः क्षत्रिया इत्यादि बोध्यम्॥ कु॥ अधिपरी अनर्थकौ॥ अनुपरप्र
योगाभावे साधुनिपुणयोगे अर्चायां गम्यमानायां संबंधसप्तमीविधायका साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेरिति अनुशासनान्मा
तरि साधुर्निपुणो वेत्यत्र सप्तमी॥ मातृसंबंधिपूजनविषयककौशलवानिति बोधः। अत्र कुं॥ सु पूजायां॥ इति योगकार्यातिरिक्तत्वात् स
कवाचकप्रसिंचनात् सुकाभ्यां योगे विषयसप्तम्यर्थप्राधिकतृतीयाविधायका सहतत्सुकाभ्यां तृतीयावेत्यनुशासनात् सिंचितं सुकावा
हरिणा हरौ वेत्यादौ तृतीयासप्तम्यौ। हरिविषयाशक्तिमानिति बोधः। न च तथापि कर्मत्वेनेत्युक्तः कर्तृत्वप्रसंगस्येत्यत्र
विशेषइति हेतुपंचकेन तत्त्वयुक्तकालप्रतिपादिकाद्विकरणत्वे सप्तमीतृतीयाविधायकाद्व्हेत्वेत्युक्तः। काचइत्यनुशासनान्मूले
नावाहयेद्देवीश्रवणेन विसर्जयेदित्यादावधिकरणे पाक्षिकतृतीयासप्तम्यौ। मूलनक्षत्रकालाधिकरणं देवीकर्मकमावाहनमिति
बोधः। शक्तिहृष्यन्थ्यो कालाध्विनोरत्यन्तसंयोगे द्वितीयाविधायिकरणे सप्तमीपंचम्यौ कारकमध्येऽत्यनुशासनाद्यमुक्ताद्व्यहाद्व्यहानाकाहेत्यादि
यक्रोशे क्रोशाद्वा लक्ष्यं विध्यदित्यादौ पंचमीसप्तम्यौ। स्वानंतरदिनकालवृत्तित्वं विभक्त्यर्थः। तिसंतेनाहिवताधिकरणे भोजनाकोति ४७